प्रथमासि कीवर्त्कुर्यो ग्रामं ... रेपाल्लवको ॥ द्वितीयं चतुर्ततायचो चतुर्थेपंचमं गर्षे ... ॥ अनघ ... माहि
सप्तमं प्रष्टमैतयो ॥ नवमं चैतथा दशपं एकादशगोनि द्विकस्तथा ॥ ... अधिकं चैतथा ज्ञेया षोडशं श्राद्धाने
षोतां ॥ ... माता पिता ... स्यात्तीर्थं तस्य तत्कार्य उच्यते ॥ उमा लक्ष्मी महा ... मासमासाना मेलये कृता ॥ ...
स्वतपापं प्रादेश स्याक्षयं वचा ॥

अथ प्रेतकल्पपद्धतिः ॥ अथांत्यदशदानानि प्रकाश्यंते । कुशासनं भूर्यासनादीं
कृत्वा प्रायश्चित्तं कारयेत् ततो व्रतधेनो धापनव्रतानां संकल्पं कुर्यात् नवसवत्सां
संपूज्य अद्येह अमुकशर्म्मणः फलतिलादिभिः गृहीत्वा व्रतानां अकृतोद्यापनजनितफ
लहानिजनित दोषापनोदनार्थं तद्दोषपरिहारार्थं इमां सवत्सां श्रीवासुप्रीतये ब्राह्मणायतु
भ्यं संप्रददे इति दत्वा सर्वप्रायश्चित्तं कुर्यात् अद्येह अमुकशर्म्मणः जन्मप्रभृत्यापर्य्यंतं ज्ञाता
ज्ञात कामाकाम सकृदसकृत्कायिक वाचिक मानसिक सांसर्गि अस्पृश्य स्पर्शन अभोज्य
भोजन अपेयपान अश्राव्यश्रवण जनित सकल पातकातिपातकोपपातक लघुपातकि
संकरीकरण मलिनीकरण अपात्रपान जन्मभ्रंशकरण प्रकीर्णपातकानां क्षयार्थं प्रायणकां
नि समये शुद्धिद्वारा श्रीवासुदेवप्रीत्यर्थं प्राजापत्यादिप्रायश्चित्त प्रत्याम्नायीभूतद्रव्यं इमां गां
सवत्सां यथाशक्त्यालंकृतां रुद्रदैवत्यां अमुकशर्मणे ब्राह्मणाय तुभ्यं संप्रददे दानवाक्य
यज्ञसाधनभूतासि विश्वस्याघप्रणाशिनि विश्वरूपधरा देवी प्रीयतामनया गवा दान
प्रतिष्ठां कृत्वा कृतैतद्गोदानप्रतिष्ठासिद्ध्यर्थं दानप्रतिष्ठात्वेन इदं सुवर्णं अग्निदैवत्यं

प्रे
१ ब्राह्मणाय तुभ्यमहं संप्रददे यश्चयस्मृत्वेतिपठित्वा तदशक्तो यथाशक्ति सुवर्णादिना सर्वमा
यश्चित्तं कुर्य्यात् अवश्यमेव पुत्रादिकर्त्ता चेत्तनस्थाने ऽस्याऽमुकशर्मण इति वदेत् तस्मि
न्दिने उपवासः कर्त्तव्यः अशक्तो हविष्याशनं शक्तश्चेत् दशदानानि कुर्य्यात् दानविधि
गोभू तिलहिरण्याज्य वासोधान्यगुडानि च रौप्यं लवणमित्याहु र्दशदानानि पण्डिताः
संकल्पः पूर्ववत् अद्येह अमुकोहं गोभूतिलहिरण्याज्य वासोधान्य गुडरौप्यलवणा
मित्यादिना सांगफलप्राप्त्यर्थं ब्राह्मणाय दास्ये तत्सत् दानवाक्य गवामंगेषु तिष्ठंति भुव
नानि चतुर्दश यस्मात्तस्मात् शिवं मे स्यादिह लोके परत्र च गोदद्यात् भूमिप्रार्थ्य सर्वभूता
श्रया भूमि वराहेण समुद्धृता अनंतसक्ति फलदा मतः शांति प्रयच्छमे तिलवाक्य मह
र्षेगोत्रसंभूता कश्यपश्यमुद्राहृताः तस्मादस्याप्रदानेन ममशांति व्यपाहति हिरण्यवा
क्यं हिरण्यगर्भगर्भस्थं हेमबीजविभावसो अनंत पुण्य फलदा मतःशांतिं प्रयच्छमे आ
ज्यं कामधेनुसमुद्भूत देवानां मुत्तममहवि देवानामासाज्यहार मतःशांति प्रयच्छमे वस्त्र रामः॥
शरणं सर्वलोकानां लज्जालक्षणमुत्तमं सर्वेषु धारिवस्त्राहं मतःशांति प्रयच्छमे धा १

न्यं सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् प्राणिनो प्यायते चैव मतः शांतिं प्रयच्छ मे गुड य
थो देवेषु विश्वात्मा प्रवरश्च जनार्द्दनः स्यामवेदस्तु वेदानां महादेवोस्तु योगिनां प्रणवः सर्व
मंत्राणां नारीणां पार्वती तथा तथा रसानां प्रवरः सर्वदेवे रसोत्तमः मम तस्मात्परां लक्ष्मीं ददस्व त्वं
१ रायो गुड सर्वदा अथ रौप्यं शांतिर्यातस्य पितॄणां विष्णुशंकरौ सदा शिवनेत्रोद्भवं रौप्यं मतः शांति
प्रयच्छ मे अथ लवणं यस्माद्रसा सर्वे नोत्कृष्टा लवणं विना शंभोः प्रीतिकरा नित्यं मतः शां
तिं प्रयच्छ मे कर्पास कणा सदा नास्ति वातस्य सुचारा लयाद्गुणाः परः तस्मात्कर्पासदा
नेन वासुदेव प्रसीदतु इति पुत्राद्यहितार्थाय ऋणाधेन्वादिदानं कुर्यात् ततो गोस
पूज्य अद्येह अमुकशर्मणो मम ज्ञाताज्ञातकामाकामकृत्याकृत्य सकलदेवपितृमनुष्या
णां ऋणपरिहारार्थं इमां सुपूजितां धेनुं अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे दानं
वाक्यं नारायणध्यानं ऐहिकामुष्मिकं चैव सप्तजन्मार्जितं ऋणं तत्सर्वं क्षम्यतां यांति गां
मेकां ददतो मम देवपितृमनुष्याणां ज्ञाताज्ञात ऋणं मया कृतं जन्मारभ्य शुद्धा सुरभिर्निर्दि
शचित्तं अद्येह अमुकोहं दानप्रतिष्ठात्वेन इदं सुवर्णमग्निदैवत्यं ब्राह्मणाय तुभ्यमहं

प्रे
२

संप्रददे ऐहिकामुष्मिकं चैव सप्तजन्मार्जितं मृणां तत्सर्वं क्षयतां याति गामेकां ददतो
मम: देवपितृमनुष्याणां ज्ञाताज्ञातमृणां मया कृतं जन्मारभ्यासुद्धा शुद्धिभूचिदक्षाचिते
अद्येह अमुकोहं दातृत्वेन इदं सुवर्णं अग्निदैवत्यं ब्राह्मणाय तुभ्यमहं संप्रददे यस्य स्मृ
त्येति पठित्वा पापधेनुं दद्यात् पूर्ववद्ब्राह्मणाचमसपूज्य संकल्प अद्येह मम जन्मप्र
भृत्या जन्मपर्यन्तं ज्ञाताज्ञात कामाकाम सकृदसकृन्मनोवाक्कायजनित सकलपापक्षया
र्थमिमां श्वेतां गां सुपूजितां अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे दानवाक्यं ज्ञाता
ज्ञातं च यत्पापं मनोवाक्कायकर्मभि तत्सर्वं विलयं याति तु गोविंदस्य प्रसादतः दानप्रति
ष्ठा अद्येह कृतैतद्दानप्रतिष्ठासिद्ध्यर्थं प्रतिष्ठात्वेन इदं सुवर्णं अग्निदैवतं ब्राह्मणाय
तुभ्यमहं संप्रददे यस्य स्मृत्येति पठित्वा अथ मोक्षधेनुदानं दद्यात् अद्येह अमुकश
र्मणः श्रीजगत्प्रीतये अमुकं दस्य प्रसादात्सायुज्यादिमुक्तिकामः इमां कपिलां धेनुं मोक्ष
धेनुं प्राप्तये अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे दानप्रतिष्ठा अद्येह अमुकोहं क रामः॥
२

कपिलादानप्रतिष्ठासिद्ध्यर्थं दानप्रतिष्ठात्वेन इदं सुवर्णं ब्राह्मणाय दास्ये दानवाक्यं
मोक्षं देहि हृषीकेश मोक्षं देहि जगत्पते मोक्षधेनुप्रदानेन मुकुंद प्रीयतां ममः अथ
वैतरणी दानं अद्येह अमुकोहं अमुकशर्म्मणः सुखेन यमद्वारे वैतरण्याख्यनदीता
रणाय गोदानं करिष्ये कृष्णां गां ब्राह्मणं च संपूज्य धेनुं प्रार्थयेत् धेनुके त्वं प्रतीक्षस्व
यमद्वारे महाभये उत्तितीर्षुरहं देवि वैतरण्यै नमोस्तु ते ब्राह्मणं प्रार्थयेत् विष्णुरूप
द्विजश्रेष्ठ भूदेव पंक्तिपावनः तर्त्तुं वैतरणीं नद्यां गामेनां प्रददाम्यहं अद्येह अमुकोहं
अमुकशर्म्मणः वैतरणी नदी दुस्तारणात्सु तरणाय इमां कृष्णां गां कृष्णवस्त्रारक्तमा
ल्यां अलंकृतां सवत्सां रुद्रदेवत्यां अमुकशर्म्मणे ब्राह्मणाय तुभ्यमहं प्रददे दानवाक्यं
यमद्वारे महाघोरे यासौ वैतरणी नदी तर्त्तुकाम प्रयच्छं तु कृष्णां वैतरणीं तु गां यासौ वै
तरणी प्रोक्ता पूयशोणितवाहिनि हेतुना तर्त्तुकामस्त्वं कृष्णां गां प्रददाम्यहं गोपुच्छं
ब्राह्मणो हस्ते दद्यात् दानप्रतिष्ठा अद्येह अमुकोहं कृतैतद्गो दानप्रतिष्ठासिद्ध्यर्थं दानप्र
तिष्ठात्वेन इदं सुवर्णं ब्राह्मणाय दास्ये पत्न्यस्तु त्वेति पठेत् स्त्रिया अमुकी देव्या इति

प्रे.
२.

सर्व्वत्रसंकल्पंकुर्य्यात् ॥ ततस्नापयेत् तत्रमंत्र गयादीनिचतीर्थानियेचपुण्या
शिलोच्चया कुरुक्षेत्रंचगंगाचयमुनाचसरस्वति कौशिकीचंद्रभागाचसर्वपापप्र
णाशिनि नंदाभद्राचकाशीचगंडकीसरजूतथा भैरवंचवराहंच तीर्थपिंडारकंस्त
था पृथिव्यांयानितीर्थानि चत्वारःसागरःस्तथाः वैतरण्यविशुद्ध्यर्थं तस्मिन्नेतो
विशंतुमे शुभ्रवस्त्रयज्ञोपवीत गोपिचंदनोद्विते सर्वांगपुष्पमालाविभूषितंकृ
त्वा तस्यमुखेसप्तसुच्छिद्रेषु हिरण्यसकलानिनिक्षिपेत् ततश्चस्थानपिंडंदद्या
त् ॥ अद्येहऽमुकगोत्रस्याऽमुकप्रेतस्य वासुदेवता प्रथमपिंडस्थानपिंडप्रदानम
हंकरिष्ये ॥ अद्येहऽमुकगोत्रऽमुकप्रेतस्यपिंडासनंतेपापतिष्ठतां ॥ अद्येहऽमुकगो
त्रऽमुकप्रेत अवनेजनंजलो पतिष्ठतां ॥ अद्येहऽमुकगोत्रऽमुकप्रेत स्थानपिंडो
मदत्तस्तवोपतिष्ठतां ॥ अद्येहऽमुकगोत्रऽमुकप्रेत प्रत्यवनेजनंतवोपतिष्ठतां
इतिस्थानपिंडंदद्यात् ॥ गृहस्थितंब्राह्मणं पश्चिमाशिर साक्षात्प्रिया मुक्तएणवेश्यं
पूर्वेणशुद्धं दक्षिणेन श्मशानंतंयत्नः ॥ ॐ अहरहर्णयजमानो गामश्वपुरुषं

राम ॥

२

पश्चैं वैवश्वतोन तृप्यंतिसुरयाश्च दुर्मती ॐ अपेत्तु मृत्तुरमृतंमउ आगाद्वै
वस्वतो नाभयंऽस्तोतु इत्यादियशक्तपठेत् ॥ ततोयमद्वारपिंडं दद्यात् पंथि
विश्रामपिंडंदद्यात् अद्येह ऽमुकगोत्रस्य ऽमुकप्रेतस्य पंथी विश्रामपिंडदान
महंकरिष्ये ऽमुकगोत्रस्य ऽमुकप्रेतस्य पिंडासन तवोपतिष्ठतां ऽमुकगोत्र ऽमु
कप्रेत प्रेत्य वनेजनं तवोपतिष्ठतां ॥ ततः श्मशानभूमिमासाद्य भूमिमाह्व
रणादि कुर्यात् ततो ब्राह्मणादिभियज्ञीयकाष्ठानि आनयेत् अगरचंदन
श्रीखंडादि देवदारु तुलसी बिल्वपलाशादि अन्यानि पद्मादीन वानयेत्
त् अथ शुचिमरणोर्विक चिकित्सिवत् कर्त्तादेशकालौ स्मृत्वा पित्रादि मरणस
यद्धो वक्षौत्याधरो शिवाभयो च्छिष्टाः स्पृशे बद्धमरणावंधन करणादि जनित्तप्र
त्यवायपरिहारार्थं श्रीवासुदेवप्रीतये कृछ्र प्रायश्चित्त प्रत्यम्नायिभूत गवादिद्र
व्यं सुवर्णं ब्राह्मणायदास्ये सूतक तव्याद्यात् कर्त्ता पुत्रादि अधिकार प्राप्त्य
र्थं किंचित्प्रायश्चित्त प्रत्याम्नायभूतं गवादिद्रव्यं ब्राह्मणायदास्ये क्रियांतकुर्वन्तय

सु. तदहस्तस्य मुंडनं शोचा: पुत्रा दशाहे तु केशश्मश्रु कनखानि च मात्रा पित्रा मृ
तो वापि पवनं न कृतं सुतैः नोपतिष्ठति तत्सर्वं दत्तं तोयं तिलादिकं तस्मात्सर्व प्रय
त्नेन तद्दिने मुंडनं शिरः पुत्र पत्नि तथा भ्राता दौहित्रः पौत्रकस्तथा यः करोत्यौ
र्द्ध्वदैहिकं सोपि तत्रैव मुंडयेत् मृतिस्थाने इति अद्येहेत्यादि ऽमुक गोत्रस्य अमु
क प्रेतस्यौर्द्ध्व दैहिकं करिष्ये तदंगत्वेन स्थानपिंडमारभ्य चितापिंड पर्य्यंत तमौर्द्ध्व दै
हिकं कर्म्माधिकारसिद्धये स्नानं करिष्ये ततोऽमुक गोत्रस्यामुक प्रेतस्य स्थानपिं
ड प्रदानं करिष्ये अमुक गोत्रस्य अमुक प्रेतस्य आसने तवोपतिष्ठतां अमुक गो
त्रस्यामुक प्रेतस्य अवनेजनं तवोपतिष्ठतां स्थानपिंड पूर्वं द्वारपिंड पथि विश्राम पिंडं ततः
श्मशान भूमिमासाद्य दर्भं वित्वा भूमौ प्रेतं निधाय पुत्रादि कर्त्ता स्नात्वा अद्येहऽमुक
गोत्रऽमुक प्रेतस्य मोक्षार्थं उर्द्ध्व दैहिकं महं करिष्ये आस्थानि च पूरहितायां भूमौ अप
२ह सर्पंति ये प्रेताय केचिदिह पूर्वजा इति भूमि प्रार्थ्य तत्र शुचि भूमौ आग्र पाषाणमेकं
निधाय तस्मिन्दक्षिणाग्रान्कुशानास्तीर्य्य अगर चंदन देवदारु बिल्व तुलसी फला

तकस्य च मृतके द्वितीये पतिते चादौ मृतकस्य शुद्धकारिष्यते १ शुद्ध्यद्विप्रा दशाहेन द्वाद
शाहेन क्षत्रिया वैश्य यहे पंचदशाहेन शुद्रो मासेन शुद्ध्यति शंशारे क्लेश दग्धस्य कृतानां
न केशवः प्रसीदस्तु सुखानाय ज्ञानदृष्टिगभो भवः यादृशं पुस्तकं दृष्ट्वा तादृशं लिखि
तं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते संवत् १९४२ मीनार्क गताशा २५ भौम
तिष्ठंति सर्वपापानि शरीरे चास्य देहिनः कुक्षिपिराडः प्रदत्तो हि तेषामेवोपतिष्ठते ततः चि
ताग्रे पायाशोपरि संस्थाप्य तन्नो अग्ने इहागच्छ इहातिष्ठतु अग्निं संपूज्य गंधाक्षतपुष्पैः
ततोऽग्नेः प्रार्थनां कृत्वा मंत्रेणानेन निश्चितं स्वाहा क्लेशनिर्विघ्न सप्तजिह्वो हुताशनः सत्व
मार्गप्रदानेन यमोपत्युरतीतकं इत्यग्निं प्रार्थ्य संस्कृत्य प्रतिष्ठाप्य संपूज्याज्येनाग्नौ जुहु
यात् अथ मंत्रः ॥ ॐ अग्नितेजाधिपतये स्वाहा १ विश्वे सत्वाधिपतये स्वाहा २ ॐ कालाय
धर्माधिपतये स्वाहा ३ ॐ पृथिव्यै लोकाधिष्ठात्र्ये स्वाहा ४ ॐ मह्यो रसाधिष्ठात्रिभ्यः स्वाहा
५ ॐ वायवे बलाधिपतये स्वाहा ६ ॐ आकाशाय सर्वाधिपतये स्वाहा ७ ॐ कालाधर्माधिष्ठात्र्ये
स्वाहा ८ ॐ मह्यः सर्वासाक्षिणीभ्यः स्वाहा ९ ॐ ब्रह्मणे वेदाधिपतये स्वाहा १० रुद्राय श्म

नाधिपतयेस्वाहा ११ इत्येकादशाहुतिंहुत्वा प्रथमंगन्धपुष्पाद्यैः क्रव्यादंसंपूज्यः ततः
प्रार्थनात्वंभूतकृज्जगद्योनिस्त्वंलोकपरिपालकः १ उपसंहारकस्तस्मादेनंस्वर्गंमृतंनय
इतिक्रव्यादमभ्यर्च्य शरीराहुतिं माचरेत् अस्मात्त्वमधिजातोसित्वदयंजायतांपुनः असौ
स्वर्गायलोकायस्वाहाज्वलतिपावक १ यमायस्वाहा २ अन्तकायस्वाहा ३ मृत्यवेस्वाहा ४
ब्रह्मणेस्वाहा ५ कालिकामेभ्योदेभ्यःस्वाहा ६ ॐ द्यावाभूमिभ्यांस्वाहा ७ ततोन्यो
घृताहुतिः ब्रह्महत्यायेस्वाहा १ विश्वेभ्योदेवेभ्यःस्वाहा २ द्यावापृथिवीभ्यांस्वाहा ३ अ
यलंवूमंत्रा॥ पूर्वाकृतानितीर्थानिध्यात्वा देवाश्चापिमुखासर्वे स्नानंगतायुष देहंपुत्रा
स्यगात्राणि दहन्तुगतिमुत्तमं अग्निदानपुत्रादिकोपसव्यंकृत्वा होमाग्निसर्वंधृत्वास्रुकंगृ
हित्वा मन्त्रम्पठेत् कृत्वादुष्करंकर्मजानताचापिजानता मृत्युकालवशंप्राप्तं नरः पंचत्वमा
गतं १ धर्माधर्मसमायुक्तं लोभमोहसमावृतं दहेयंसर्वगात्राणिदिव्यांलोकान्सगच्छतु॥ इ
तिमंत्रंशीघ्रमुच्चार्यविप्रदक्षिणांचितायांकृत्वा होमाग्निसर्वंधृत्वास्रुकंपुरुषस्यशिरप्रदेशेदानं
स्त्रियाः पादोदेशात्स्रुकंदेयं दह्यमानशवस्यकंपनंहवनंछेदनंकर्तव्यं कुत्रचित्तोमाद्गुःस्तनं

राम:

ततः कुक्षिपिंडं दद्यात् २ उपक्रयात् ३

शमस्थलापत्तियं कस्मै शुद्धाय नाहन्ते दक्षिणे नरस्य: इति मंत्रेण प्रेतं उत्तानं दक्षिणाशिरस्क
निदध्यात् पूर्ववत् ततः प्रेतमरणादिकोष्टैराच्छादयेत् ततः कर्यादौ समग्रपरित्यज्य
प्रसः शिरःप्रदेशे स्त्रियाः पादप्रदेशेऽपसव्येन हुताशनमादाय: ॐ कृत्वातु दुष्कृ
तं कर्म जानता वाप्यजानता मृत्युकालवशं प्राप्तं मनपत्वमागतं च धर्माधर्मसमायुक्तं
लोभमोहसमावृत्तं आदहसर्वगात्राणि दिव्यांल्लोकान्स गच्छतु एवमुक्त्वा ततः शिघ्रं
हस्ता चैव प्रदक्षिणा ज्वालमानं तथा वन्हि यथानं च प्रदीयेत इति सप्तप्रदक्षिणा कृ
त्य ततो दह्यमाने प्रेतोपरि तिलान् विकिरेत् क्रव्यादाय नमः इति मंत्रेण चितोपरि स
प्तप्रदक्षिणा कुर्वत् सप्तसमिधप्रक्षिप्य तदुल्कोपरि सप्तकुठारप्रहारकान्दत्वा त
तो यथास्थानादस्थिनि निकास्य कपोतावशेषं देहं ज्ञात्वा निष्काश्य क्षालयित्वा
वस्त्रेणा परिवेष्ट्या आगधजल प्रक्षिपेत् अथास्थिसंचयनं तद्यथा सन्निहित या
स्वभूमौ अर्घेहा अमुक गोत्रस्या अमुकप्रेतस्या स्थीसंचयन स्वोद्ध्यासनं तवोपति
ष्टतां ऽमुकप्रेता अमुकगोत्र अवनेजनं तवोपतिष्टतां अर्घेहा ऽमुकगोत्रा ऽमुकप्रे
त एष आमपिंडा महस्तवोपतिष्टतां अर्घेहा ऽमुकगोत्र ऽमुकप्रेत प्रत्यवनेजनं त

वोपतिष्ठन्तां एतत्ते शीतलोदकमुपतिष्ठतां अयं ते गंध इत्यक्षतां पवित्राणि सूत्राणि
एव आमवलिधूपदीपंत्वोपतिष्ठतां इति दत्त्वा विसृज्य अन्नपानपक्वान्नभक्ष्यभो
ज्यपायसपाकदेशकालोद्भवफलमूलगंधमाल्याधूपदीपादिनि मृन्मयेषु भांडेषु के
चिद्दृशाचारात्स्थापितान्यादाय ॐ नमः क्रव्यादमुखेभ्यो देवेभ्यो इति मंत्रेणा त्वरा
न्वितं प्राचिनावितिभीः केचिदंघं केचित्पूर्वं इति प्रकारेणा श्मशानदेवता पूज्याः
ततः सर्वज्ञातिभिनमः क्रव्यादमुखभ्यो देवेभ्य इति क्रव्यादमुखान्हित्वा प्रेति
न्श्मशाने देवाः स्युर्भवत्तश्च सनातनाः तस्मात्प्रकाशकं संतु बलिमष्टगमक्षयं प्रेत
स्यास्य शुभाः लोकान्प्रयच्छंतु पिशाचश्च तौत अस्माकमायुरारोग्यं सुखं च दत्तां
श्रियं इति मृद्भांडसंस्थाप्यः भक्ष्यभोज्यबलिं दत्त्वा विसर्पयत ततो यज्ञीयवृक्षोद्भव
शाखावाद्गुमाचामादायत याज्ञियनिपरिवत्यापसव्येन क्रमाद्वृक्षं दत्वा प्रेतस्या
शिरोवस्त्र वक्षः पाणिनाभिपार्श्वपादिस्थतानि दक्षिणहस्तकनिष्ठांगुष्ठाभ्यां उद्धृत्य
पंचगव्येन स्नापयित्वा कुंकुमादिना उलिप्य सर्वौषधीभिश्चकृत्त्वा दक्षिणोत्तरा
यतां कुष्पुरूपवर्ज्यां कुशानास्तीर्य्य ॐ नमः मावाचा आज्येन आस्तरणा विपया पृथिव्या

मस्तत: यापाथं रसेन निर्वया भ्यसौक्षोमवस्त्रेण वेष्ट्या नव आच्छादने मृन्मय भांडे
निक्षिप्य: तद्भांडे मस्त रामे वृक्षमूले वा शुचौ देशे संस्थापयेत ततः श्चिताभस्मागारा
घान्तोतोया विनिक्षिपेत ततो श्चितास्थलं वहुदकेन शुसंशोध्य गोमयेनालिप्य: त
तोर्दीपं प्रज्वाल्य चित्तापिंडं दद्यात अद्येहा ऽमुक गोत्रस्या ऽमुक प्रेतस्य चित्तापिंड प्रदा
न महं करिष्ये अद्येहा ऽमुक गोत्र ऽमुक प्रेता अत्यवने जने तवोपतिष्ठतां इति संचय
नवहुधा पुष्पचैर्नामः क्रव्याद मुखेभ्यो देवेभ्य: इत्यादिभि: श्मशानदेवता पूजयेत
त स्थलं गोक्षीरेण अभ्युक्ष्य विसर्जयेत ततः श्चितास्थालंम प्रदक्षिणामाकृत्य निरी
क्ष्यमाणा अन्यूजलं मभि सामित्तं गच्छेयु तत्र पवनं कारयित्वा अकृतमुंडनस्योदक
दानादि वैयर्थ्य श्रवणात्त पिंडदानात्प्रागवश्यं मुंडनं कुर्य्यात इतरे प्रथमदिने अस
भवु चिरात्रावपि भवतीत्याहु: रवौ चे मुंडनं न कुर्य्यात प्रातः कार्य्य प्रसंगाद स्थिप्र
क्षेपो विधियं महापुन्यं नद्यां श्रवणा यथा दशाहाभ्यांतरे ऽस्थि प्रक्षेपे गंगा भवति त
योनंत असंभवे कालांतरेपि पुत्रादि गंगा गत्वा स्नात्वा पंचगव्येन स्थीनी सि
क्त्वा हिरण्य मध्वाज्य तिलाभि श्चितानि मृत्पिंड संपुटं निधाया दक्षिणादिशां पश्य

६

उ नमोस्तुधर्मराजायेतिजलं प्रक्षिप्य क्षिप्रं गंगाम्भसि क्षिपेत् जलंतु तीर्थस्थमुद्दिश्य
विप्रमुखान्यथाशक्ति दक्षिणां दत्वा गंगातोयेषु यस्यास्थि दशाहाभ्यंतरे प्लवेत्त न त
स्यापुनरावृत्ति ब्रह्मलोकात्कदाचनेति नियमस्मरणात् तत्र दीपदानसंकल्पः अद्ये
हऽमुकगोत्रस्यऽमुकप्रेतस्य प्रलोकांधकारनिवृत्यर्थं अद्यावधि दशदिनपर्यंतं
तैलाक्तखंडदीपा मद्दत्तस्तवोपतिष्ठंतां अथ प्रत्युत्थामभिधीयते वहति शुद्धतोयस
मीपं गत्वा अपसव्येन सचेलस्नात्वा पाणिपादौ प्रक्षाल्याचम्य ऽपसव्यं विधाय मु
क्तशिखो भूत्वा दक्षिणाभिमुखं निमज्जेत् सव्यं कृत्वा आचम्याऽपसव्येन मुक्त
शिखो दक्षिणाभिमुखो भूत्वा स्नानसंकल्पः अद्येहाऽमुकगोत्रस्याऽमुकप्रेत
स्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये प्रथमदिनसंबंधिना प्रथमदिननिमित्ता
य एकपिंडदानार्थं स्नानं करिष्ये स्नात्वाचम्याऽपसव्येन दक्षिणादिशि पाषा
णोपरि एकं शिखं पवित्रं स्थापयेत् तस्योपरि दशदिनपर्यंतं दिनवृद्धेन तिलतो
यकुशांजलिं दद्यात् अंजलिं गृहीत्वा अद्येहाऽमुकप्रेतस्य प्रेतत्वविमुक्तये उत्तम
लोकप्राप्तये प्रथमनिमित्तायाश्चित्तादाहजनिततृषोपशमनाय एष तिललतोयांज

रामः ॥
६

प्रथमा दिने रौरव नाम नरकोत्तारणाय मूर्द्धावयव संभूत्वा पुर॰ । द्वितीये दिने योनि कुंभव नाम नरकोत्तारणाय चक्षुः श्रोत्र नासासंभूत्यै
तृतीये दिने महारौरव नाम नरकोत्तारणाय भुज ग्रीव वक्ष संभूत्या पुर॰ । चतुर्थे दिने तामिश्र नाम नरकोत्तारणाय उदर नाभि वा स्थिलिंग गुदमो
पंचम दिने ऽधतामिश्र नाम नरकोत्तारणाय स्पृष्ठो हजानु जंघा चरणा वयव । षष्ठमदिने संभ्रम नाम नरकोत्तारणाय निखिलांग प्रत्यंग मर्म्मावयव संभूत्यै
सप्तम दिने मे ध्यक्रामि नाम नरकोत्तारणाय सर्वगात्र वयव संभूत्यै पुरक । अष्टम दिने पीषभद्रारण नाम नरकोत्तारणाय नख रोम संभूत्यै पुरक पिंड

त्तिमहत्तस्तवोपतिष्ठत्तां तथान्यदिवसे प्रथम दिन संबंधि ऽमुक दिन निमित्ताय यथ
तिलतोयांजलीरम्भ दत्तस्तवोपतिष्ठत्तां अथ दश दिन पर्यंत पुत्रश्च दत्तांजलि दत्त्वा स
व्येनाचम्य स्नात्वा कर्मस्थाल मागत्वा दक्षिणाभिमुखं वेदी निर्म्माय तत्रस्थालसा
निध्यं पाकार्थ चुल्लि विधाय पाकं कृत्वा दीपं प्रज्वाल्य: अपसव्येन संकल्प्य: अद्ये
हाऽमुक गोत्रस्याऽमुक प्रेतस्या प्रेतत्व विमुक्तये उत्तमलोक वाप्तये प्रथम दिन संबंधि
प्रथम दिन निमित्ताय प्रथमा दिने रौरव नाम नरकोत्तारणाय मूर्द्धवयवसंभूत्वा पुरकपिं
डप्रदानं करिष्ये तूष्णीं वामभागे कर्मपात्र संस्थाप्य तदुपरि एक शिखं पवित्रं तिलं
गंधाक्षतान् निक्षिप्य वेद्युपरि एक कुशासनं संकल्प्य: अद्येहाऽमुक गोत्रस्याऽमुक प्रेत
स्या पिंडाशनं स्तवोपतिष्ठत्तां अद्येहाऽमुक गोत्रस्याऽमुक प्रेतऽवनेजनं तवोपतिष्ठत्तां पिं
डदानं अद्येहाऽमुक गोत्राऽमुक प्रेतस्य रौरव नाम नरकोत्तारणाय मूर्द्धावयव संभूत्वा
एष पुरक पिंडो महत्त स्तवोपतिष्ठत्तां अद्येहाऽमुक गोत्राऽमुक प्रेत प्रत्यवनेजनं तवो
पतिष्ठत्तां अपुत शीतलोदकमुपतिष्ठत्तां अपयंते गंध एत्य क्षता भृंगराज पत्राणि उप
तिष्ठत्तां अपयंत धूपदीप एमानि ऊर्णासूत्राणि मध्यन्न वलि स्तवोपतिष्ठत्तां धूपदीपौ

प्रे.मं.
७

अद्येहाऽमुकगोत्रस्याऽमुकप्रेतस्यारतत्तेशीतलोदकं गंधक्षतपुष्प्या धूपदीपोर्णासूत्र
मधन्नबलिस्तवोपतिष्ठतां ततः स्तिलकुशतोयपात्रं दर्भयुतं पिंडोपरि दद्यात् अ
द्येहाऽमुकगोत्रस्याऽमुकप्रेतस्य। चित्तादजनित तृषोपशमाय प्रथमदिनसंबंधिप्र
थमदिननिमित्ताय एकतिलकुशतोयपात्रं मद्दत्तं तवोपतिष्ठ तिलतोयपात्राणि दिन
वृद्धिदेयानि सर्वं कृत्वा कर्मपात्रं उत्थाय पिंडोपरि भ्रामयित्वा तत्र मंत्र अनादि
निधनो देव शंखचक्रगदाधर अव्ययपुंडरीकाक्ष प्रेतमुक्तिवरदो भव: इति भ्रामयि
त्वा अपसव्येन पिंडपशु निक्षिपेत् जलाश्रये क्षिप्त्वा दंतधावनसहितं नीरक्षीरस
हितं वानलपात्रे निधाय चितानलपात्रोपरि निषेक तत्र मंत्र चितानलप्रदग्धोसि
परित्यक्तोसि बांधवै इदं नीर मिदं क्षीर मत्र स्नाहि इदं पिब अयातियावदाकाशे पिंड
वाय्यमड्डशिखा तावत्त्व मसुखेतिष्ठ इदं तोयं निक्षिपेत् इति क्षिप्त्वा सव्येन स्ना
त्वा शुभ्रवस्त्रोत्तरीयेण परिधाय स्वगृहमागच्छेत् एकभक्ताशन हविष्याशनं कु
र्यात् अदिदशादिनपर्यंतमेवविधानेन कृत्वा द्वितीयदिने यानि पुंसवनामनरका

रामः
७

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचंद्रं
भजे ॥१॥ श्रीरामजी अतसीपुष्पसंकाशं पीतवाससमच्युतम् येनमस्यंतिगोविंदं नतेषांविद्यते भयं ॥२॥

तारणाय चक्षुश्रोत्रनासासंभूत्यै एषपुरकपिंडो मद्दत्तस्तवोपतिष्ठतां ३ तृतीयदि
ने महारौरवनाम नरकोत्तारणाय भुजग्रीवचक्षुसंभूत्यै ४ चतुर्थदिने तामिश्रनाम
नरकोत्तारणाय उदरनाभिवास्थिलिंगगुदामेढ्रावयवसंभूत्यै ५ पंचमे अन्धता
मिश्रनाम नरकोत्तारणाय उरस्पृष्ठोरुजानुजंघाचरणावयवसंभूत्यै ६ षष्ठमदि
ने सम्भ्रमनाम नरकोत्तारणाय निखिलागत्यर्गमर्म्मसंभूत्यै ७ सप्तमेमेध्यकृमि
नाम नरकोत्तारणाय सर्वगात्रसंभूत्यै ८ अष्टमे पुरीषभक्षणनाम नरकोत्तारणाय
नखरोमसंभूत्यै ९ नवमे स्वमांसभक्षणनाम नरकोत्तारणाय वलवीर्य्यमर्म्मासं
भूत्यै १० दशमेदिने कुंभीपाकनाम नरकोत्तारणाय क्षुत्पिपासानाशाय एषपु
रकपिंड मद्दत्तस्तवोपतिष्ठतां ११ एवं क्रमेण प्रत्यहं दशदिन पर्य्यंतानि पृथक् कृत्यं
शेषपूर्ववत् इतिदशदिनकृत्य तत्रादौ निर्णयवाक्यं विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रि
योवाहनायुधं वैश्यः प्रत्योदरश्मीन्वा शूद्रायष्टीकृतशय्या ब्राह्मणोदशरात्रेण
द्वादश्याहेनक्षत्रिया वैश्यपंचदशाहेन शुद्रोमासेनशुद्ध्यति इत्याशौचनिर्णयवि
चार्य दशमदिने वस्त्राणि प्रक्षालनार्थं रजकगृहेगत्वा अवशिष्टवासांसि दश

मदिनेमल्लाल्नयेत्त दशमदीने गृहे लोपनपूर्वकं ताम्रभाजनोदिशं शोध्यः मृन्मयभांडा
नित्यक्त्वाः दीपंजलाशयेनिक्षिप्य दंडंचनिक्षिप्य पिंडदानादिकृत्वा प्रथमदिनकर्त्ता
चलिंवेदिंचकुंभंचसंभेद्य आकाशेपयोदानं अमुकप्रेताय इदंपय उपतिष्ठतां ततःपि
पाथेयश्राद्धमोदनमेकंवटकंकृत्वा संकल्प्य अद्येहाऽमुकगोत्राऽमुकप्रेतायपा
थेयश्राद्धे इदंवटकान्नसहितायमोदनं तवोपतिष्ठतां इतिमार्गमध्येदत्वाः ततो
उत्तरेजलाशयेगत्वा सर्वोवांधवा यथादेशाचारंनखरोमछेदनाभ्यांपूर्वंकोमला
पकर्षणंस्नानंकृत्वा वासांसिपरिधाय मंगलद्रव्याणिस्पृशेत् दधिपूर्वंगोरोचन
हरिद्रा रोमपाल्लततामृत्तिकाशर्षपं चंदनब्राह्मणपादगाव एतानिमंगलद्रव्याणि
स्पृष्ट्वा पंचगव्यंप्राश्य गृहेवांधवैःसहभुंजीत इतिदशदिनकृत्वा अथैकादश
हकृत्यां प्रथमंदंपतिपूज्या शैय्यादेया ततःपरःपश्चाच्छ्राद्धैकादशाहिकं एवंकर्म
णाविधिः प्रथमेण स्नात्वा अद्येहाऽमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्ति
ऽर्थयस्वर्गलोकप्राप्तये द्विजदंपत्योः पूजनंकरिष्ये स्नानंकारिष्ये स्नात्वा दक्षि
णोत्तरायत्ता शय्यांविस्तीर्य्य सामग्रीसंपाद्य शुभेपवित्रेणाके दंपतिपूजनंकुर्या

ग अद्येहेत्यादि देशकालौ संकीर्त्य ऽमुकप्रेतगोत्रस्य ऽमुकप्रेतस्य प्रेतत्वविमुक्तये
ऽक्षयस्वर्गलोकप्राप्तिकामा द्विजदंपत्त्योः पूजनं करिष्ये इति संकल्पः द्विजदंपतिभ्यां
नमः पाद्यं अर्घं गंधं अक्षतां पवित्राणि धूपं दीपं पूपकादि नैवेद्यं वस्त्रालंका
रणादिभिः संपूज्यः द्विजदंपतिभ्यां नमः वस्त्रभूषणानि इति नाममंत्रेण संपूज्य वस्त्र
भूषणादि नि यथासंभवं दत्वा अद्येहाऽमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्त
येऽक्षयस्वर्गलोकप्राप्तिकामः द्विजदंपत्यो पूजनकर्म्मणः एतानि पाद्याद्यादि गंधाक्षत
धूप दीप नैवेद्य वासोभूषणानि युवाभ्यां संप्रदद्ये दक्षिणासंकल्पः अद्येहाऽमु
कगोत्रस्याऽमुकप्रेतस्य प्रेतत्वप्रेतविमुक्तये ऽक्षयस्वर्गलोकप्राप्तये द्विजदंपतिभ्यो:
पूजनकर्म्मणः सांगतासिद्ध्यर्थं इमां निरजित दक्षिणां ब्राह्मणाय ददास्ये तत्सत्र त
तो लक्ष्मीनारायण प्रतिमा अग्न्युत्तारणपूर्वकं पंचगव्येनास्नापयित्वा प्रतिष्ठाप्य
शय्योपरि निधाय पूजासंकल्पः अद्येहऽमुकगोत्रस्या अमुकप्रेतस्य नरका
दि सकलदुःखोद्धारण सकलभोगसमन्विता [illegible] स्वर्गलोकप्राप्तिकामा श्री
लक्ष्मीनारायणप्रतिमा युवाभ्यां पूजनं करिष्ये अथ लक्ष्मीनारायणध्यानम्

दक्षिणोर्ध्वकरे पद्मं शंखं मूर्ध्वकरे न्यसेत् वामोर्ध्वकरे चक्रं लक्ष्मीपृष्ठे करं न्यसेत्
वामोत्संगगता लक्ष्मी रत्नपात्रकरा भवेत् पद्मासन गता कुर्यात् ध्यायेद्देवं चतुर्भुजम्
दक्षिणास्तकरे व्यासं पृष्ठे देवस्य चक्रिणः इति ध्यात्वा नाममंत्रेण पूजनं कृत्वा ॐ लक्ष्मी
नारायण पाद्यं ऽर्घं गंधं ऽक्षतां पुष्पाणि धूपं दीपं पूपकादि नैवेद्यं वस्त्रभूषणादि
भिः संपूज्य: संकल्पः अद्येह ऽमुकगोत्र ऽमुकप्रेतस्य प्रेतत्वविमुक्तिकाक्षय स्वर्ग
लोकप्राप्तिकाम श्रीलक्ष्मीनारायणप्रतिमा एतानि पाद्यादिभिर्गंधाक्षतपत्रधूप
दीपनैवेद्यवासोभरणादिभी युवाभ्यां संप्रददे दक्षिणासंकल्पः अद्येहा ऽमुकगोत्र
स्य अमुकप्रेतस्य प्रेतत्वविमुक्तिकाम ऽक्षय स्वर्गलोकप्राप्तिकाम श्रीलक्ष्मीनाराय
ण पूजाप्रतिष्ठासिद्ध्यर्थं एतानि रजतनिष्कायि भूतं द्रव्यं ब्राह्मणाय तुभ्यं संप्रददे
ततो सय्यादान संकल्पः अद्येहा ऽमुकगोत्रस्य ऽमुकप्रेतस्य प्रेतत्वविमुक्तिकाम इ
मानि पूर्वोक्त भोज्याशय्याफलवस्त्रसमन्वितायां ऽमुकशर्मणे ब्राह्मणाय तुभ्यम
हं संप्रददे अथ कांचन पुरुषपूजनं अद्येहा ऽमुकगोत्रस्यामुकप्रेतस्य नरकादि दुःखा
वारण पूर्वकाक्षय स्वर्गलोक प्राप्तिकामनाय कांचन पुरुषस्य पूजनं करिष्ये: कांचन

पुरुषायायनमः पाद्यं अर्घ्यं गंधं अक्षतं पुष्पाणि धूपंदीपं कूपकादि नैवेद्यं वस्त्रभू
षणादि संपूज्य शय्यादानसंकल्प यथोक्तलक्षणवतीसय्या दक्षिणेन्नरायत्तांपरि
स्तीर्य्य शिरप्रदेशे घृतकुंभनिधाय चरणप्रदेशे ज्वलंति चतुर्वतिकानिधाय पार्श्व
यादुग्धकुंभ जलकुंभौ स्थापयत् लक्ष्मीनारायणप्रतिमासर्वौषधीपंचामृतेन
स्नापयेत् शय्योपरिस्थापयत् गंधाद्युपचारैः संपूज्य इतिसंक अद्येहत्यादिदे
शकालौ संकीर्त्य अमुकगोत्रस्या अमुकप्रेतस्य प्रेतत्वविमुक्तये सकलनरकादिदुः
खोद्धारणपूर्वकामक्षय स्वर्गलोकप्राप्तिकामा यमयातनारहित सकलदुःखोद्धा
रणपूर्वका इमां शय्यां दधिद्रा कुंभ घृतकुंभ जलकुंभ दीपकाच्छत्र चामराशय्यापादुकोपा
नाह वाहनायुध पात्र भोजन पात्र विविध भक्ष भोज्यादि फलपुष्पगंधानुलेपनो द्वर्तन
तांबूल धूपेपधान्यवितानक जलसिंहासनादि तिलकार्य मादर्शसौवर्णरजत ताम्रादि
भाजन सुवर्णभूषणानि दुकूल लोहद्राक्षा मादवसभाजन करपूरमृगमद श्रीखंड
कुंकमसलका अगरुप्रियंगुदधि शर्षपाक्षीरविकृतानि नारिलं कदलादिकौशय

क्षौमाणि कार्प्पासिक नानावस्त्रैसौवर्णादि रजतभूषणादीनि यथाशक्त्युपकल्पि
तानि यथाकरणावती शय्यां प्रजापतिदैवत्यां लक्ष्मीनारायणप्रतिमासहितां गंधा
दिभिः सपूजितां अमुकगोत्रोत्पन्नाया ऽमुकवेदाध्यायिने ऽमुकशर्म्मणे ब्राह्मणाय तुभ्य
महं संप्रददे इत्युच्चार्य्य जलमुत्सृजेत् यथानक्षत्रशयनं शून्यसागरजातय शय्यात
थापशून्यास्तु यथाजन्मनिजन्मनि ततो दानप्रतिष्ठा अद्येह ऽमुकगोत्रा ऽमुकप्रेतस्य
शय्यादानप्रतिष्ठासिद्ध्यर्थं मिमां सुवर्णादिनिष्क्रयीभूतं द्रव्यं ब्राह्मणाय प्रदातुभ्यंमहं
प्रददे अथ कपिलादानं यथोक्तलक्षणावती कपिलां गामानीय संकल्पं अद्येहे
त्यादेशकालौ संकीर्त्य ऽमुकगोत्रस्य ऽमुकप्रेतस्य प्रेतत्वविमुक्तये अक्षयस्वर्गलोकप्रा
प्तिकामः कपिलादानमहं करिष्ये गोपादौ प्रक्षाल्य गव्ये नमः गंधाद्युपचारैः सम्पूज्यः
कपिले हरभे सर्ववर्णानां पूजनीयासि रोहिणी तीर्थधेनुमयी यस्मादतः शांतिं प्रयच्छ मे
अनेन मंत्रेण संपूज्य गवामंगेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्तस्माच्छिवं मे स्यादि
हलोके परत्र च इत्यप्रार्थयेत् ततः तिलकुशयवजलान्यादाय देशकालौ स्मृत्वा अद्येह

अमुकगोत्रस्य ऽमुकप्रेतस्य ऽक्षयस्वर्गलोकप्राप्तिकाम इमां कपिलां गां सवत्सां यथाश
क्ति अलंकृतां श्रीलक्ष्मीनारायणप्रीतये ऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इ
ति सकुशाक्षततिलसुवर्णसहितं गोपुच्छ विकरे दद्यात् ततो दाता दानप्रतिष्ठां कुर्यात्
अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिकाऽक्षय स्वर्गलोकामः कपिलादानक
र्मणः प्रतिष्ठासिद्ध्यर्थं गोदानप्रतिष्ठां त्वेनं सुवर्णमग्निदैवतं गोदानप्रतिग्राहिब्रा
ह्मणाय तुभ्यमहं संप्रददे अथोदकुंभदानम् एककुशब्राह्मणं कुंभोपरि संस्था
प्रतिष्ठाप्य गंधादिभिः संपूज्य कुंभोपरि सदुग्धं जलपूरइत्वा सदुर्व्यंकृत्वा धान्योप
रि स्थापयित्वा पार्श्वयोश्चतुर्दीक्षिनित सपक्वोपरीतं सस्वया सदीपपात्रं स्थापयित्वा
कुंभोपरि संकल्प अद्येहत्यादिदेशकालौ स्मृत्वा अमुकगोत्रस्याऽमुकप्रेतस्य प्रे
तत्वविमुक्त्यै अक्षयस्वर्गलोकप्राप्तिकामः एतान्युक्तसाधिकसप्तत्रयकुंभान्सदीपा
न्सवत्सु एवंविधि प्रतिदिनस्य क्षुत्तृपिपासाधकारोपशान्त्यर्थं ब्राह्मणाय दास्ये तत्सत
एकस्मै ब्राह्मणाय संवत्सरदिनगणितं यथाशक्त्या अन्नं प्रयच्छन्ति यस्मि

आत्मनां संवत्सरं पर्य्यंतं तस्मिन्तिथौ संभोजयेत यावदह्नं गुर्योदद्या उदकुंभविप्र
तसर प्रेताघ्रान्नसमायुक्तं सोश्वमेधफलंलभेत् अथवृषोत्सर्गविधि सर्वसामग्री
संपाद्य देशकालौ स्मृत्वाऽमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिकामनयास्वर्गलो
कप्राप्तये वृषोत्सर्गमहं करिष्ये अस्मिन्वृषोत्सर्गकर्मणि ब्रह्माचार्य्यवरणपूजनमहं
करिष्ये अस्मिन्वृषोत्सर्गकर्मणि कृताकृतावेक्षणाय त्वं ब्रह्माभव तथाऽचार्यकर्मक
र्तुमाचार्य्योभव ॐपरिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्येति पंचभूसंस्कार पूर्वकम
ग्निसंस्कारान्विधाय अग्नेः संस्थापनं ततोब्रह्मासनं आत्मासनं प्रणीपात्रं उदकेता
न पूर्ण दर्भैराछादनं उत्तरेणनिधानं वर्हिषाप्रदक्षिणामग्निस्तरणं अर्थवत्याच्छा
दनं पवित्रेच्छेदनानि त्रिणिकुशतरुणानि द्वेपवित्रे प्रोक्षणीपात्रं आज्यस्थालिक्षी
रपाके चरुस्थालिं समार्जनकुशाः पंच उपयमनकुशास्त्रिप्रभृतयः समिधस्ति
स्रुगव्यमाज्यं ब्रीहितंडुलः पूर्णपात्रं पिष्टचरु सिद्ध पवित्रकरणं त्रिभिर्दर्भैर्द्वे छेदये
प्रोक्षणीपात्रे प्रणीतोदकमासिंच्य अर्थवत्प्रोक्षः आज्यप्रोक्ष्य स्रुवं प्रोक्ष्य

पराामासादितपात्रप्रोक्षणं अग्निंचरप्रोक्षणीधानं आज्यस्थालिमाज्यं निर्वाप्य पायस
स्थाल्यादिक्षिरसेचनं तंडुलप्रक्षेप· आज्याधिश्रयणं युगपदग्नावारोपणं उपर्यग्नि
करणं सुभयो अङ्गाश्रितं चरोः स्रुवप्रतपनं संमार्जनकुशैः संमृज्य पुनःप्रतप्य दक्षि
णतोनिधानं आज्योद्वासनं पश्चाच्चरूद्वासनं आज्योत्पवनं अवेक्षणामदूष्यानिनंस
वं प्रोक्षण्युत्पवनं उपयमनकुशानादाय तिष्ठत समीधादानं प्रोक्षण्युदकेन चुल्लु
कगृहीतेन पर्युक्षणं तंडुलप्राशितोदकेन प्रोक्षणं पवित्रे प्रोक्षणीनिधानं दक्षिण
रजान्वारब्धजुहोतिस्रुवेण ओं इहरतिः स्वाहा इदमग्नये ओं इहरमध्वं स्वाहा इदम
ग्नये ओं इहधृतिः स्वाहा इदमग्नये ओं उपसृज्यं धरुणं मात्रधरुणो मातधयेन्स्वाहा
इदमग्नये ओं रायस्पोषमस्मासुदीधरत्स्वाहा इदमग्नये ततो ब्रह्मान्वारब्धो जुहो
ति ओं प्रजापतयेस्वाहा· इदं प्रजापतये ओं इंद्रायस्वाहा इदमिंद्राय ओं अग्नयेस्वा
हा· इदमग्नये ओं सोमायस्वाहा· इदं सोमाय ओं रुद्रायस्वाहा· इदं रुद्राय ओं शिवाय
स्वाहा· इदं शिवाय ओं सर्वायस्वाहा इदं सर्वाय· ओं पशुपतयेस्वाहा· इदं पशुपतये· ओं

उग्रायस्वाहा ओं ईदं उग्राय ओं भवायस्वाहा इदंभवाये ओं महादेवायस्वाहा ओं इदंम
हादेवाय ओं ईशानायस्वाहा इदंईशानाय ततः चरोर्जुहोति ओं पूषावा अन्वेतु
न पूषारक्षतु सर्वतः पूषावाजान्सनोतुनः स्वाहा इदंपौष्णे ततः पायसंचरुंजुहो
ति ओं अग्नयेस्विष्टकृतेस्वाहा इदंस्विष्टकृते ततोभूराद्याधानवाहुतयः ओं भूस्वाहा
इदंमग्नये ओं भुवस्वाहा इदंभुवाये ओं स्वः स्वाहा इदंसूर्य्याये ओं तन्नोऽग्नेत्स्वा
हा इदंमग्निवरुणाभ्यां ओं सत्वन्नोऽग्ने इदंमग्नये ओं अयाश्चाग्ने इदंमग्नये ओं
येतेसतं वरुण इदंमग्निवरुणायादित्येसवित्रे विश्वेविश्वेभ्योमरुद्भ्यः स्वर्केभ्यः
ओं उदुत्तमं वरुणपाश इदंवरुणायादित्ये संस्रवप्राशन पवित्रप्रतिपत्ति प्रणीतावि
मोक ब्रह्मणे पूर्णपात्र वरयोरभ्य तरस्यदानकृत्वा होतृब्रह्मणाभ्यांदक्षिणांदत्वा
अथवत्सरीवृषभमादायां अपरस्त्तरतः नमःसेतिरुद्रा ध्यानं रुद्रस्य वाजंभद्र
ध्यइत्यंतं पठित्वा ततोदक्षिण पार्श्वशूलेन वामपार्श्वे शूलेन वामपार्श्वे चक्रेण
वृषभमंकयित्वा श्रीसूक्तं पठित्वा अथ श्रीसूक्त ओं हिरण्यवर्णां हरिणीं सुवर्णां

रजतस्त्रजां चंद्रांहिरण्मयींलक्ष्मीं जातवेदोममावह: ताम्मआवहजातवेदो ल
क्ष्मीमनपगामिनिं यस्यांहिरण्यंविंदेय गामश्वंपुरुषानहं अश्वपूर्वांरथमध्यांह
स्तिनादप्रमोदनी श्रीयंदेवीमुपह्वये श्रीर्मादेवीजुषतां कांसोस्मितांहिरण्य प्राका
रामार्द्रांज्वलंतिं तृप्तांतर्पयंति पद्मास्थितांपद्मवर्णां तामिहोपह्वयेश्रियं चंद्रंप्रभासाय
शसांज्वलंतीश्रियंदेवीलोके देवजुष्टामुदारां तांपद्मनेमिंसरणमहंप्रपद्ये अलक्ष्मी
मेनश्यतांत्वांवृणोमि आदित्यवर्णेतपसोधिजातो वनस्पति स्तववृक्षोथबिल्व स्त
स्यफलानि तपसानुदंतुमायां तरायश्चबाह्याअलक्ष्मी: उपैतुमांदेवसखः कीर्तिश्च
मणिनासह प्रादुर्भूतो सुराष्ट्रेस्मिन्कीर्तिंवृद्धिं ददातुमे क्षुत्पिपासामलांज्येष्ठां अ
लक्ष्मीनांशयाम्यहं अभूतिमसमृद्धिंच सर्वांर्णिनुदमेगृहात् गंधद्वारांदुराध
र्षानित्यपुष्टिंकरीषिणीं ईश्वरीसर्वभूतानां तामिहोपह्वये श्रियम् ॐमनस:काम
माकूतिंवाच: सत्यमशीमहि पशूनांरूपमन्नस्य मयीश्रीयश:श्रिश्रयतांय
श कर्दमेनप्रजाभूता मयिसंभवकर्दम श्रियंवासयमेकुलेमातंपद्ममालिनीम्

निजेदेविमातरंच श्रियंवासयमकुले आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनिम् सूर्यांहि
रण्मयींलक्ष्मींजातवेदममावह तांम आवहजातवेदो लक्ष्मीमनपगामिनिम् यस्यांहिर
ण्यंविंदेयंगामश्वंपुरुषानहं यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं श्रियःपंचदशर्चं
च श्रीकामःसततंजपेत् सरसिजनिलयेसरोजहस्तधवलतरेशुभ गंधमाल्यासोभेहरी
भवनभेविभूतिदेप्रसीदमह्यं श्रिवर्चसामा पुष्पमा विधात्य वमान महीयते धान्यंधनप
शुं पुत्रलाभं शतसंवत्सरं दिर्घमायु इतिश्रीसूक्तं ऋग्वेदोक्तः हिरण्यवर्णाःशुचयः पा
वकायसुजातः काश्यपोयास्विंद्राया अग्निंगर्भंदधिरेविरूपास्ता आपःस्योनासु
हवाभवंतु ॐयासांराजावरुणोयातिमध्ये सत्यानृते अवपश्यंजनानां मधुश्चुतःशु
चयोयाःपावकास्ताःआपःस्योनासुहवाभवंतु ॐयासांदेवीदिविकृण्वंति भक्ष्यं याअंतरिक्षे
बहुधाभवंति याःपृथ्वीपयसोंदंतीशुक्रास्ताःआपःसंस्योनासुहवाभवंतु ॐशिवेनमा
चक्षुषापश्यताप्यःशिवयातनुवोपस्पृशत्वचंमे सर्वांश्छेदस्युषदाहुवेदोमयिवर्चोविधत
केचित्श्रीसूक्तंपठंतियथोक्तं आपोहिष्ठेतित्रि ऋभिशन्नोदेवीति मंत्रेण वत्सतरीसंस्था राम

प लोहघंटानूपुरकनकदृ सिंदूरकज्जल मृग्दा भर्वासोभिश्चालंकृत्य संपूज्य प्रार्थ
येत् कामधेनुकुलेजाता स्त्रियायन्त्य स्वधाप्रदा नरकाधुद्धरत्वेन स्वर्गलोकं मयार्चिता
इतिप्रार्थ्य वृषभं पूजत् धर्मत्वंवृषभरूपेण जगदानंदकारकः अष्टमूर्त्तेरधिष्टान मतःपा
हिसतन्नमः इतिवृषभं संपूज्य वृषभस्यदक्षिणकर्णेजपेत् वृषहिभगवान्धर्म्मश्चतुष्पद
गकिर्त्तित वृणोमितमहं भक्त्या समां रक्षतु सर्वदाः इतिजपेत्वा सकल्पः अद्येहाऽमुक
गोत्रस्या मुकप्रेतस्या प्रेतत्वविमुक्तिपूर्वकाक्षय स्वर्गलोक प्राप्तये प्रेतानि वत्सतरी युतं ये
नं वृषमुत्सृजेत् करसंपुटं कृत्वा मंत्रपाठ पठेत् ऊँ येनंयुवानंपतिंवो ददामितेन क्रीडंतिश्च
रथप्रियेण सानः साप्तजनुषा सुभगा यस्यायेणसमिधामदंम हेवत्सतर्य्या वृषमपिनमवा
प्रयोक्तव्याः किंतुत्यक्ताः सत्योवनेश्वनेनप्रयेणासह सर्वाछंदं चरतन्नमतः तृणा नियादतः इ
तिपठित्वा वत्सतरीमध्यस्थं वृषभमभिमंत्रयेत् ऊँ मयोभूरभिमावाहयिस्वाहा मरुतासिमा
रुत्तोगणाः संमुर्मयोभूरभिमावहिस्वाहा वंस्यूरसिंदुवह्याछवमयोभूरभिमावाहि स्वाहा
यास्ते अग्ने सूर्य्यस्यरुचोदि मानोज्योतिरस्मिभिः ताभिन्नो अद्य सर्वाभिरुचेजनाय न
स्कधियादेवाः सूर्य्योरुचोगोष्वश्वयुच पारुचंद्रे घ्राग्नि नाभिसर्वाभिरुचन्नोधेहिआस्य

णेषु रुचथँ राजसु नस्कृधि रुचँ विश्येषु शूद्रेषु महि धेहि रुचा रुचं ॐ तत्त्वा यामि ब्रह्मणा वँ
द्यमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशथँ समान ऽआयु
प्रमोषि ॐ स्वर्णघर्त स्वाहा स्वर्णार्का स्वाहा स्वर्णः शुक्रः स्वाहा ॐ स्वर्णज्योतिः स्वाहा
ॐ स्वर्ण सूर्य स्वाहा इति मंत्रानुवाकेन वृषभमभिमंत्र्यः वृषभवत्सतारिणा पुच्छेनोदा
यदक्षिणा मुखोऽपसव्येन पितृतीर्थेन तिलकुशजलेनोत्तर्पयेत् स्वधा पितृभ्यो वंधुभ्यश्च
पितृभ्यये मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षयाः गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवा ये
प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः वृषोत्सर्गेण ते सर्वे लभंतां तृप्तिमुत्तमां दद्यादनेनमं
त्रेण तिलाक्षतयुतं जलं इति तर्पयित्वा ततो लोहकांस्यवरं दत्वा इति दक्षिणा संकल्पः
अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिकामये वृषोत्सर्गकर्मणः सद्गुण्यार्थं इमां
दक्षिणां ब्राह्मणाय दास्ये तत्सत् इति दत्वा विसर्जयेत् अथ वृषभलक्षणं यस्य भागयुते
शृंगे स्वाभिमुखे च सर्वदा सर्वेषामेव वर्णानां स च सर्वार्थसाधिकः वर्ज्यो नाहं कृष्णतालो
र्दशनो ह्रस्वकस्य पार्श्वयो अशक्तो दत्तहश्चापि निरिवदश्वस्मयान्वित ध्वांक्षाश्चगस रागः॥

माभासा स्तथा मुखकसन्निभा कुब्जकाराश्च खञ्जाश्च केकरामास्तथैव च अत्यंतमु
ल्कपादाश्चा भाद्रा तज यना स्तथा नैतद्वृष्याश्च योक्तव्या गृहे धार्य्य कथंचन वृषस्तु हायनः
वृषो वत्सतर्य्यो पित्रहायत्यो गृह्या चतस्रो वत्सतर्य्यास्तु दर्वासभवतापिचेति एतस्यफ
लमाह एष्याबहवः पुत्राय दकोपि गयां व्रजेत् यजेत वाश्वमेधेन नीलंवा वृषमुत्सृजे
त् पतिपुत्रवतीनारी भर्तुरग्रे मृतायदि वृषोत्सर्गं न कुर्वीत गां च दद्यात्पयस्विनीमिति
वचनात् पतिपुत्रवतीस्त्रीणां वृषोत्सर्गनिषेधः प्राप्तस्तदपवादमाहः एकादशाह्नि प्रे
तस्य पश्यंते त्सृज्यते वृष प्रेतत्वं सुस्थिरं तस्य दत्ते श्राद्धसतैरपि इतिवचनाद्वृषस्यैव
कार्य्यः इति वृषोत्सर्गविधि अथ एकादशाहश्राद्धविधि पाकविधाय स्नात्वा स
कल्प: अद्येहाऽमुकगोत्रस्या मुकप्रेतस्या एकादशाकर्त्तव्यायथाधिकृत्यार्थ स्ना
नं करिष्ये इति संकल्प भातिविनावति स्नात्वा श्राद्धदेशमागत्वा आचम्य ब्राह्मणानि
मंत्रयेत गतोसि दिव्यलोकं त्वं कृतांतविहितान्यथा मनसावायभूतेन कृतान्तविहि
तोन्यथा विप्रत्वाहं नियोजयेत् पूजयिष्यामि भोजन सर्वविप्रे निमंत्रयेत इति मंत्र

प्रे॰सं॰
१५

तैलाभ्यंगंकृत्वा उदङ्मुखो भूत्वा अपसव्यं अद्येह ऽमुकगोत्रे ऽमुकप्रेतत्व २ तत्पाद्यं मद
त्तं त्वोपतिष्ठतां इति पाद्यं अमुकगोत्र ऽमुकप्रेतस्य एष पादार्घो मद्दत्तं त्वोपतिष्ठतां
इति पादार्घं दत्वा अद्येहा ऽमुकगोत्रस्या ऽमुकप्रेतत्व विमुक्त्य ऽक्षय स्वर्गलोक प्राप्त्यर्थं
एकादशाह श्राद्धमर्घपिंड सहितमेकोद्दिष्ट विधानेनाहं करिष्ये इति संकल्पः आसनं
अद्येह ऽमुकगोत्रस्यामुक प्रेतस्य एतत्ते आसनं त्वोपतिष्ठतां इत्यासनं दत्वा अर्घं संपा
द्य अद्येहा ऽमुकगोत्रा ऽमुक एष हस्तार्घो मदत्तं त्वोपतिष्ठतां इत्यर्घं दत्वा अयं ते गंध
उपतिष्ठतां इत्यक्षत इमानि भृंगराजपत्राणि त्वोपतिष्ठतां अद्येह ऽमुकगोत्रे ऽमुकप्रे
तेते इमानि गंधाक्षत पुष्पाणि धूपदीपौ यज्ञसूत्र वासो भूषणादि निमदत्तानि त्वोप
भोजन पात्र प्राक्षालितं [illegible]
तिष्ठतां इत्युच्चार्य विप्रहस्ते जलं दद्यात् ततः पाकमादाय भोजनपात्रे अन्नं सघृतं सो
पस्कारं संस्थाप्य कुशतिलयवजलान्यादाय ऽमुकगोत्र ऽमुकप्रेत इदमन्नं सोपस्कारं
सपरिवेष्टं तत्सर्वं त्वोपतिष्ठतां ध्वमित्याज्ञा दत्वा विप्रकरे संकल्पं दत्वा भुंक्ष्व धोमित्युक्ते २
दत्वा ततः रामशाला पुनरपोदत्वा क्षीरघृतमधुमिश्रितमन्नमादाय विल्वमात्र रामः॥

दुध घी लहू तिल. शमीपत्र गमणोनपींड द

मदत्वाज्यातिलकुशमिश्रितामन्नीं ऽमपुरोनिधाय कर्मपात्र पूर्ववत्स्थापनं पूर्ववत् कर्मं गंधाद्युप
चारैः १

सुवृत्तं पिंडं कृत्वा वितस्तिमात्रं गोमयोदकेन चतुरस्रमंडलं विधाय ॥ अद्येह अमुकगोत्रस्याऽ
मुकप्रेताय तस्य वृत्तपिंडासनं तवोपतिष्ठतामिति अद्येह अमुकगोत्राऽमुकप्रेत अवने
जनं तवोपतिष्ठतां ऽमुकगोत्रऽमुकप्रेत एकादशाहाद्य श्राद्धे एष पिंड मदत्तस्तवोपति
ष्ठतां इति पिंडं दत्वा तथाऽमुकगोत्रऽमुकप्रेत प्रत्यवनेजनं तवोपतिष्ठतां इदं जलमुप ते
तिष्ठतां इमानि गंधाक्षत धूपदीपोर्णासूत्राणि मधुमन्नवल्यादीनि मदत्तानि तवोपतिष्ठतां
अद्येहामुकगोत्रामुकप्रेत इमानि गंधाक्षत धूपदीपोर्णासूत्राणि मधुमन्नवल्यादीनि
मदत्तानि तवोपतिष्ठतां इति दत्वा तथाऽमुकगोत्रऽमुकप्रेतस्य एतत्तदन्नोदकादिकं मदत्तं तवो
पतिष्ठतां इति विप्रकरे जलं दत्वा दक्षिणासंकल्पः अद्येहामुकगोत्रस्यामुकप्रेतस्य एकादशा
हश्राद्धकर्मणः सांगतासिद्ध्यर्थं रजतादि दक्षिणा श्राद्धभोक्तृभ्यो ब्राह्मणेभ्यो यदास्ये तदा
स्मै उपतिष्ठतां इत्युच्चार्य्य उपतिष्ठतां विप्रकरे दत्वा ततो देशकालौ स्मृत्वा अमुकगोत्र
स्य एकादशाह श्राद्धं यत्कृतं तद्विप्रप्रसादात् अमुकृतं भवतु इति प्रार्थ्य कर्मपात्रं विप्र
पादाभ्यां नीनीयः सव्येनाचम्यः अनादिनिधनो देव शंखचक्रगदाधरः अक्षय्य पु

अद्येह अमुकगोत्रस्य अमुकशर्मणः प्रेतत्व विमुक्तये स्वर्गलोकप्राप्त्यर्थं प्रसौ चांत्यपद्धति पन्हि षोडश श्राद्धानि त
प्रथममासिकं श्राद्धं अन्यार्घस्नानं करिष्ये इत्यादि क्रमेण सर्वं ज्ञेयं सर्वोत्रापि.

डरीकाक्षं प्रेतमुक्तिवरदो भव॥ इति पठेत् एतत्कर्मोपसमेन दक्षिणाभिमुखेन वामजा
नुनिपातेन कुर्य्यात् अनेनैव विधानेन सर्वाणि मासिकश्राद्धानि कुर्य्यात् ततो ब्राह्मणा
य सर्वा सामग्रीं दत्वा शय्यायां क्षणं विश्राम पाद संवाहनं कृत्वा उल्मुकं ब्राह्मण समप
यित्वा तस्थानं सत्यज्यान्यत्र गत्वा मासिकश्राद्धानि कुर्य्यात् नः स्वधामि विकिरं चैव
न मंत्रा नासि यस्तथा तृप्तिप्रश्नानवाह्वानं नदेव ओद्दरणादिकं प्रेतश्राद्धे विवर्ज्याणि क
मीव्यस्तो विजानता नवमं वन्हिहोमं च दशमं स्वस्तिवाचनं तथा कार्य्याणि सर्वाणि
षोडशः श्राद्धकर्माणि पृच्छाशनार्घ पूजानं शंकल्प श्रावनेजनं पूजा विप्रस्य पिंडस्याक्ष
यास्थान कल्पना संकल्पो दक्षिणा याच्ञा तथा विप्रविसर्जनं प्रेतश्राद्धं भवेदेभिरेकाद
दशाभिः सदा अथ षोडश श्राद्ध निर्णयः द्वादश प्रतिमास्यानि आद्यं षाण्मासि
के तथा ऊनादिकं तथा श्राद्धं सपिंडीकरणं तथा एवं क्रमेण कर्त्तव्यमित्युक्तं षो
डशं षोडशं इति क्रमः तत्रैकेन दिवसांते भिवीदिने उपनर्व मासिक कालः संवत्सर
त्रिभिरेकैं नवानपुनादिक तथैव ज्ञातव्यः अनेन्यस्तु तु षोडश श्राद्धविकल्पा यथा

देशं यथाकुलं ज्ञातव्या तत्र मासिकन्नाम् प्रथम द्वितीय तृतीय चतुर्थ पंचम षण्मासि
कोन षण्मासिक सप्तमाष्टमा नवम दशमैकादशा द्वादशो नाह्निक मासिक श्राद्धानिकु
र्य्यात् क्वाचिदधिमासपतेन दधिमास श्राद्धमपि कर्त्तव्यः इत्येकादशाहश्राद्धकर्म समा
प्तं अथ सपिंडिकरण श्राद्धविधौ तत्र सूत्र संवत्सरान्ते सपिंडिकरणं स्यादिति प्रथ
मपक्षः वृद्धौ द्वितीयः पित्रपक्षे पितृपक्षे तृतीये त्रिपक्षे चतुर्थः द्वादशेह्नि पंचम एकाद
शेह्नि षष्ठः एते विकल्पाः पूर्वपूर्वालाभे उत्तरोत्तरव्यवस्था या ज्ञातव्याः अनेत्यात्कुलधर्माणां
देशानां च यथा प्रयुक्तत्वात् अस्थितस्य शरीरस्य द्वादशाहप्रशस्यते सपिंडीकरणं ज्येष्ठपुत्रस्या
धिकारः यदुक्तं वायुपुराणे श्राद्धानि षोडशापाद्य कुर्य्यात् नैव सपिंडनं आर्षिनामासिते
पुत्रैः कालादपि चिरात्तथा विभक्तो वासिन्निहितो ज्येष्ठपुत्रस्य कुर्य्यात् विभक्तोकनिष्ठेन स्व
कीयं द्रव्यं दयं अथ श्राद्धप्रयोगः तद्दिने प्रातः कृत्याद्याह्निकं कृत्वा मध्याह्ने प्रशस्त जलाश्र
ये गत्वा तत्र शुभस्थले मंडलत्रयं कुर्य्यात् उत्तरे वैश्वदेव मंडलं चतुरस्रं दक्षिणे प्रेतमंडलं
त्रिकोणं तत्पूर्वं पितामहादिमंडलं वर्तुलं निर्माय मध्ये वर्तुलीविधाय लौकिकाग्निं तामध्ये

श्र.सं.
१७

जनं सरसुपंपाकं कृत्वा ब्राह्मणानाहूय तेषांश्मश्रुखनिष्कासन पूर्वकं केशक्षौरं कारयित्वा
तैलाभ्यंगपूर्वकं स्नानं कारयेत् स्वयंकर्ता मध्याह्ने स्नानंकुर्यात् संकल्प अद्येहेत्या
दि अमुकगोत्रोहं ऽमुकप्रेतस्य प्रेतत्वविमुक्त्यऽक्षय:स्वर्गलोक प्राप्तये सपिंडीश्राद्ध
कर्म्मणि त्यार्थं मध्याह्नस्नानंकरिष्ये· इतिसंकल्पस्नात्वा श्राद्धसामग्रीसंपाद्य उत्तरे वै
श्वदेविकब्राह्मणं दक्षिणाग्रतोमंडले: प्रेतब्राह्मणं तत्पूर्वपितामंडले· पितामह ब्राह्मणं चा
वैश्वदेवे एतत्तेतिप्रतिष्ठाप्य ॐभूर्भुव: स्व:कालकामुक संज्ञक वैश्वदेविकब्राह्मणस्तु प्रति
ष्ठितो भव: इतिप्रतिष्ठाप्य यवानादाय सव्यंजान्यानिमंत्रयेत् अद्येहामुकगोत्र ऽमुक
प्रेत पित्रादित्रयश्राद्धसंबंधिनां कालकामुकसंज्ञक वैश्वदेविकब्राह्मणानां अद्यकर्तव्ये स
पिंडीकरणश्राद्धे भवान्मया निमंत्रित: निमंत्रितोस्मि प्रत्युक्ति: अक्रोधनैशौचपरै: सतत
ब्रह्मचारिभि भवितव्यं भवद्भिश्च मयाश्च श्राद्धकर्मणि सर्वायाचविनिर्मुक्तो कामक्रोधवि
वर्जित भवितव्यं भवद्भिर्नो अयने श्राद्धकर्मणि इतिपठित्वा आगतंवस्तुस्वागतं एततपा
द्यं यत्फलं कपिलादाने कार्तिक्यांजेष्ठपुष्करे तत्फलं पांडवश्रेष्ठ विप्राणां पादशौचने अभ्य
क्तो तानिष्ठतिका तत: प्रेतमंडले गत्वा प्रेतब्राह्मणं निमंत्रयेत् सव्यंकृत्वा: वामजानुनि

पात्य तिलान्गृहीत्वा गतोसि दिव्यलोकं अस्मिन्कृतांत विहितां न्यथाः मनसा वायुभूतेन
विप्रत्वाहं नियोजयेत् पूजयिष्यामि भोगेन एवं विप्रं निमंत्रयेत् इति पठित्वा अद्येहऽ
मुकगोत्रस्यामुकप्रेतस्य अद्य कर्तव्ये सपिंडीकरण श्राद्धे त्वं भवान्मया निमंत्रित निमंत्रि
तोस्मि तत्र तुलसीकर्मपात्रं संस्थाप्य ततो मध्ये नाचम्य पंचगव्येन कुशैर्मार्जयित्वा पिता
मह ब्राह्मणं संस्थाप्य एतं तेति प्रतिष्ठाप्य पितामहादिब्राह्मणेषु प्रतिष्ठितो भवः सव्यं कृत्वा
तिलान्गृहीत्वा निमंत्रयेत् अद्येहामुकगोत्राणां प्रेतस्य सुवृद्धितर स्वशूराणां पिताम
हप्रपितामहाः ऽमुकाऽमुकशर्मणां वसुरुद्रादित्यस्वरूपाणां अद्य कर्तव्ये सपिंडीकरण श्राद्धे
ब्राह्मणं भवान्मया निमंत्रितो निमंत्रितोस्मि अक्रोधनेत्यादि पठित्वा आगतं सुस्वागतं ए
तद्ध पाद्यं यत्फलं कपिलादानेति पठित्वा ततः सव्यं कृत्वा वैश्वदेविकविप्रसमीपं गत्वा यव
कुशगंधाक्षतैः पादार्घं गृहीत्वा पादार्घं संपाद्य पादार्चनविधौ अर्चनं नमः सुगंधं नमः पत्रपुष्पा
क्षतं नमः इति विप्रपादौ संपूज्य पादार्घं गृहीत्वा अद्येह ऽमुकगोत्र ऽमुकप्रेतपित्रादि त्रयश्राद्ध सं
बंधिनो कालकामुक नाम विश्वेदेवा एष पादार्घो नमः स्वाहा इति दत्वाचम्य श्राद्धदेशो त्र

पादार्घ २

से

श्रा. मं.
१८

स्वत्र अत्रोपविश्यतां इति ब्राह्मणानुपवेश्य: ततो यमसव्यं कृत्वा प्रेतब्राह्मणसमीपं गत्वा पादार्घ्यं
सजलतिलकुशसहितं पादार्घं गृहीत्वा अद्येहामुकगोत्रेऽमुकप्रेत एष पादार्घस्ते पो प्रतिष्ठतां
इति दत्वा पंचगव्येन कुशैर्मार्जयित्वा सव्य आचम्य अपसव्य पितामहादिविप्रसमीपं गत्वा पादार्घ्यं संपाद्य
पादार्चनसंधौ अत्रं नमः पादार्घजलेन विप्रपादौ संप्रक्षाल्य पादार्घं गृहीत्वा अद्येहाऽमुकगोत्र
प्रेतपितृपितामहप्रपितामहाऽमुकाऽमुकशर्मणा वसुरुद्रादित्यस्वरूप: एष पादार्घो वास्तु स्वधा:
ततः सव्य आचम्य: श्राद्धदेशे ब्राह्मणानुपवेश्य: सव्येन कर्मपात्रस्थापनं: भूमौ शंखचक्रादिकं लि
खित्वा आसनोपात्रपात्रोपरि पवित्रकं पवित्रस्थो वैष्णव्यौ शन्नोदेवीति जलं यवोसीति यवान्
तिलोसीति तिलान् गंधजलपुष्पाक्षतादि तुलसी निक्षिप्य: कर्मपात्रं संपन्नमिति तेन जलेन ना
स्थान सर्वं एतत्सपिंडीकरणश्राद्धसामग्रीं संप्रोक्ष्य शरणायाम्यं विधाय: पुंडरीकाक्षाय नमः
ॐ देवताभ्य इति त्रिजपः मंत्रं वा धीति पठित्वा ततः प्रेतस्य सपिंडीकरणश्राद्धं समारभ्येत ॐ सोमस्य
निविरशिशिविष्णो शर्मासि शर्मयजमानस्य संस्कृत्य योनिरशि इति मंत्रेण वामकरे निविमा
रोप्य: अथ दिग्बंध: अग्निष्वात्ता पितापितृगणा प्राचिरक्षं मे दिशि तथा वर्हिषद पांतु या राम:
म्यं चापितर स्तथैति दिग्बंधनं कृत्वा सव्येन यद्देवाति कर्म्मपात्रलंभनं कृत्वा शुद्रादिदृष्टिदोष १८

निपातात्संकर्षणादीयात्पाकपूर्तोस्तु ततःप्रधानसंकल्पः अद्येहऽमुकगोत्रस्याऽमुकप्रेतत्वविमु
क्तै पितृपितामहप्रपितामहऽमुकाऽमुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः सपिंडीकरणार्थं कालका
मविश्वेदेवापूर्वकं अर्घपिंडसहितं सपिंडीकरणश्राद्धमहंकरिष्यामिति संकल्पः वैश्वदेविकवि
प्रसमीपंगत्वा कुशद्वयंगृहीत्वा अद्येहऽमुकगोत्रप्रेतपित्रादित्रयश्राद्धसंबंधिना काल
कनामसंज्ञकानांविश्वेदेवानां इदमासनंवोनमः ॐभूर्भुवःस्वः इदमासनं आस्यतां आ
स्य इदं आसनंदत्वा अद्येहामुकगोत्रस्यामुकप्रेतस्या इदमासनमदत्तं तवोपतिष्ठतां
दक्षिदत्वापसव्येनाचम्य कुशमार्जितइत्वा पित्रादिब्राह्मणसमीपंगत्वा अपसव्येन तिलमोट
कंगृहीत्वा अद्येहाऽमुकगोत्राणांप्रेतपितृपितामहप्रपितामहानांऽमुकाऽमुकशर्म्मणां वसु
रुद्रादित्यस्वरूपाणां इदंकुशासनंनमस्तुः ॐभूर्भुवःस्वः इदमासनं आस्यतां आस्य इदं
आसनंदत्वा ऽपसव्येन प्रेतब्राह्मणसमीपंगत्वा एवंकुशगृहीत्वा अद्येहामुकगोत्रस्या
ऽमुकप्रेतस्या इदमासनमदत्तंतवोपतिष्ठतां इतिदत्वासव्येनाचम्यः कुशैर्मार्जयित्वा पित्रादि
ब्राह्मणसमीपंगत्वा· अपसव्येन तिलमोटकंगृहीत्वाः अद्येहऽमुकगोत्राणांप्रेतपित्र

प्रपितामहानां ऽमुका ऽमुकशर्म्मणां वसुरुद्रादित्यस्वरूपाणां इदं कुशासनं मस्तु ॐ
भूर्भुवः स्वः इदमासनं मासितां आस्य इदमासनं दत्त्वा सव्येन विश्वेदेवा आवाह
नं कुर्यात् यवान्गृहीत्वा अद्येहामुकगोत्रप्रेतपित्र्यादि त्र्यपुरुषसंबंधिनः कालकाम
नाम्नो विश्वान्देवानावाहयिष्ये इदं आवाहयेव ॐ विश्वेदेवास आगत शृणुता म इ
मथु मितिमन्त्रेणावाह्य आगच्छन्तु महाभागेति पठित्वा इत्यावाहयेत् ततः अपसव्यं पित्रा
दिब्राह्मणान्नावाहयेत् अपसव्येन तिलमोदकं गृहीत्वा अद्येहामुकगोत्रान्प्रेतपितृपि
तामहप्रपितामहान् पितॄन्नावाहयिष्ये आवाहय ॐ उशन्तस्त्वा निधिमह्युशन्तः समिधी
उशन्नुशत आवह पितॄन्हविषे अत्तवे इत्यावाह्य ततः वैश्वदेवसमीपे गत्वा हस्तार्घस्था
सर्वं प्रेत ब्राह्मण समिपे गत्वा हस्तार्घस्थापन. पः अपसव्येनाचम्य कुशैर्मार्जयित्वा पित्रादीनां (उपसव्य) हस्तार्घस्थापयित्वा भूमौ शरवचक्रा ५ सर्वं शरनचक्रा ग्धादि हस्तार्घ
दिकं लेखनं आसन आसनेपात्र पात्रेपवित्र पवित्रस्थो वैश्वव्यो शन्नोदेवीरिति जलं ति
लाः सितिलाज्ज गंधाक्षतपुष्पादि निक्षिप्य हस्तार्घपात्राणि पाटपूर्णानि मन्त्रमंत्रु इति स्पृष्ट्वा
सव्येन वैश्वदेवीकार्य्ये पात्रमागग्र विप्रकरे निधाय सव्येन सपवित्रेषु यादिव्या ऽआपप

यमासँवभूव्यो हिरण्यवर्णा स्तान आपसशं स्योना सुहवा भवंतु अद्येह ऽमुकगोत्र
ऽमुकप्रेतपित्रादित्रय श्राद्ध संबंधिन: कालकामे नाम विश्वेदेवा एष हस्तार्घो वो नम:
स्वाहा इति जलं विप्रपाणौ दद्यात् तत: अपसव्यं कृत्वा प्रेतार्घपात्रं वामकरेण दक्षिण
हस्तेन गृहीत्वा उभाभ्यां हस्ताभ्यां आदाय अद्येह ऽमुकगोत्र अमुकप्रेत एष हस्तार्घ मदत्तस
वोपतिष्ठतां इत्युच्चार्य्य विप्रहस्ते जलं किंचिद्दत्वा शेषं भागत्रयं प्रेतपित्रादित्रयं सिंचति
तयथार्थं प्रेतार्घ पंचगव्येन संप्रोक्ष्य: आचम्य: गंगा गया कुरुक्षेत्रादिन् स्मृत्वा प्रेतार्घपा
त्रं वामकरे धृत्वा प्रेतपितृपात्रं दक्षिणकरेणादाय अद्येह ऽमुकगोत्रे ऽमुकप्रेत अमुकगो
त्रेण प्रेतपित्रा ऽमुकशर्म्मणा सह प्रेतत्व विमुक्तये पितृत्वकारणाय अर्घेणार्घं योजया
मि इति पितृसंबंधीन विप्रं स्मृत्वा योजयति तेनानुज्ञात: मंत्रान्पठेत् ॐ संसृज्य [illegible]
तुत्वा पृथिवी वायुरग्नि प्रजापति: संसृजध्वं पूर्वेभिः पितृभिः संहसमानीव आकूति: स
मानि हृदयानि व: समानमस्तु वो मनो यथा व: सुसहासति: ॐ संगच्छध्वं संवदध्वं संवो म
नांसि जायतां देवा भागं यथा पूर्वे संजानाना उपासते इति पारक्या मंत्रत्रयं पठित्वा

ॐ येसमानाःसमनसःपितरोयमराज्ये तेषांलोकःस्वधा नमोयज्ञोदेवेषुकल्पतां ॐ येस
मानःसमनसोजीवाजीवेषुमामकाः तेषांश्रीमर्यिकल्पतामस्मिंल्लोकेशतंसमाः इत्युच्चा
र्य्यः तृतीयभागंजलंपित्र्यर्घपात्रेआसिंचयेत् तथाऽमुकगोत्रअमुकप्रेतऽमुकगोत्रे
णाप्रेतपितामहेनऽमुकशर्मणासहप्रेतत्वविमुक्तयेपितृत्वकारणायअर्घेणसहऽर्घंयोज
यामियोजयामिः पूर्वोक्तमंत्रान्पठित्वा तथाऽमुकगोत्रऽमुकप्रेतऽमुकगोत्रेणाप्रेतपि
तृपितामहेनऽमुकशर्मणासहप्रेतत्वविमुक्तयेपितृत्वकारणायअर्घेणसहऽर्घंयोजया
मि पूर्वोक्तमंत्रान्पठित्वा योजयेत् ततः तत्प्रेतपात्रंपितामहादिपात्रमूलस्थाप्यः अध
हऽमुकगोत्रऽमुकप्रेतःऽमुकगोत्रैःस्वपितृपितामहप्रपितामहैःऽमुकाऽमुकशर्माभिर्वसु
रुद्रादित्यस्वरूपैः सहसायुज्यंगच्छ एषवोनुगतः प्रेतापितरस्वंददामिवः शिवमस्तुचेश
याणांजायतांचिरजीविनः इतिपठेत् ततः सपवित्रेषुहस्तेषु इतिपवित्रंकरेदत्वा ॐ विश्व
यादिव्याआपपयसासंबभूवुर्य्याअन्तरिक्षा उतपार्थिवीर्य्याःस्तानआपसंस्योनासुहवा
भवंतु अर्घेहामुकगोत्रामुकप्रेतपितरमुकशर्मन्वसुस्वरूप एषहार्घस्तु पुनःप्रत्य

र्घंचः तथास्तपवित्रेषु इतिपठित्वा अद्येहाऽमुकगोत्र प्रेतपितामहाऽमुकशर्मन्नेतद्रुस्व
रूपा एष हस्तार्घः पुनः अत्यर्घंचः तथास्तपवित्रेषु इति ऽमुकगोत्र प्रेतपितामहाप्रपिता
महाऽमुकशर्मन् आदित्यस्वरूप एष हस्तार्घस्तोऽस्तु पुनः अत्यर्घंच इति हस्तार्घं दत्वा
ततः सर्वान्संश्रवान् प्रथमपात्रे समवनीय सव्यंकृत्वा अर्घोदकं शीर्यद्द्यात्पुत्रपौत्र
विवर्द्धनं इति शिरसा विषिंच्य अपसव्यंकृत्वा तत्पात्रं लोकान् शुधंता लोकाः पितृ
षदनमसि इति नुब्जंकृत्वा तदुपरि स्वधावाचनीयान् त्रीन्दर्भान्संस्थाप्य स्वधानीयो
नमः इति संपूज्य सव्यंकृत्वा विश्वेदेवा ब्राह्मणांपूजयेत् नमोस्त्वनंताये मंत्रेणगंधाक्ष
तपुष्पैः संपूज्य अपसव्येन प्रेतब्राह्मणां समीपे गत्वा प्रेतब्राह्मणां गंधाक्षतपत्रैः संपूज्य
अपसव्येन मार्जयित्वा अपसव्येन प्रेतपित्रादि ब्राह्मणां संपूजनं ॐ ब्राह्मणार्चनविधौ अ
यं नमः पितृभ्यः स्वधायिभ्यो इति मंत्रेण पूजयित्वा सव्येन विश्वेदेवा ब्राह्मण समीपे धूपं
दीपं संकल्प अद्येह अमुकगोत्रऽमुकप्रेतपित्रादि त्रयश्राद्ध संबंधीनः कालकामना
मः विश्वेदेवार्चनविधौ इमानि गंधाक्षतपुष्पधूपदीपवासोभूषणादिनि यथाशक्ति

पकल्पतानिवश्चक्ष्व्ह्ना इतिदत्वा अपसव्ये प्रेतब्राह्मणसमीपंगत्वा अद्येह ऽमुकगोत्र
ऽमुकप्रेत इमानिगंधाक्षतपत्रधूपदीपार्णाम्बूलमध्यनवल्यादिवस्त्रभूषणाद्व्याणि मद
त्तस्तवोपतिष्ठंतां इतिदत्वा सव्येनाचम्य: पंचगव्येन कुशैर्मार्जयित्वा: पित्र्यादिब्राह्म
णसमीपेगत्वा धूपदीपसंकल्प: अद्येहाऽमुकगोत्रप्रेतपितृपितामहप्रपितामह अमु
काऽमुकशर्मणा वसुरुद्रादित्य:स्वरूपा: ब्राह्मणार्चनविधौ इमानिगंधाक्षतपुष्पधूप
दीपवासोभूषणादि यथाविभागं व: स्वधा अर्चनविधि: परिपूर्णोऽस्तु अस्तुपरिपूर्ण:
पिंडो ण देवा नी सव्येनाचम्य भस्मना चतुष्कोणमंडलं विधाय यथाचक्रायुधो विष्णु: त्रैलोक्यं परिर
क्षतु एवंमंडलं भस्मांकं सर्वभूतानि रक्षतु: पत्रावलि संस्थाप्य: अन्नपरिवेष्य अपोक
रणार्थं घृताक्तमन्नं परिवेष्य गृहीत्वा पृच्छति: भो ब्राह्मणा युष्मदनुज्ञया अग्नौकरणं मह
करिष्ये ओं कुरुष्वेत्युक्ते: ज्ञाता पितामह विप्रहस्ते जलेवाऽजुहुयात् ओं अग्नये कव्यवाहना
यस्वाहा इदमग्नये कव्यवाहनाय: ओं सोमायपितृमतेस्वाहा: इदं सोमायपितृमते: शे
षमन्नं विद्वान्वर्ज्यं पितृब्राह्मणे दद्यात् सव्येनान्नं परिवेष्य: वैश्वदेविकब्राह्मणसमी
पेगत्वा: अधोमुखाभ्यां पाणिभ्यां मधु२ पात्रमालभ्य जपति पृथ्वीतेपात्रं द्यौरविधानं रामः॥

इतिपठित्वा ॐइदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे विष्णु
हव्यरक्षस्व यवान्विकीर्य अंगुष्ठाग्रहणं इदमन्नादिकं सर्वं हव्यं संकल्प: अद्ये
हऽमुकगोत्र प्रेत पित्रादि त्रयश्राद्धसंबंधिभ्य: कालकामनामसंज्ञकेभ्यो विश्वेभ्यो इदं
मन्नं सोपस्करं घृताद्युपस्करसहितं पत्यारि विष्टपरिवेष्यमाणं आत्मतृप्तिपर्य्यन्त:
इतिविभागवस्वाहा: इतिजलंदत्वा ततो ऽपसव्येन: प्रेतमंडलंगत्वा घृतान्नमन्नं सो
पस्करं परिवेष्य: अद्येह ऽमुक गोत्राय ऽमुकप्रेताय इदमन्नं सोदकं सोपस्करं परिवेष्य
तवोपतिष्ठतां तत: कुशैर्माजयित्वा सव्येनाचम्य पितृत्र्यादिमंडलेगत्वा अपसव्ये
न उत्तानाभ्यां पाणिभ्यां मधु २ पात्रमालभ्येति अंगुष्ठग्रहणं कृत्वा अन्नसंकल्प: अ
द्येहामुकगोत्रेभ्य: प्रेतपितृपितामहप्रपितामहेभ्य: अमुकामुकीदेवेभ्य: अमुकशर्म
भ्यो वसुरुद्रादित्यस्वरूपाभ्य: इदमन्नं सोदकं सोपस्करं यथाविभागवस्वधा इति
२५ विप्रकरेजलंदत्वा: तत: पिंडनिर्वाणं कुर्यात् अपसव्येन: प्रेतमंडलंगत्वा सव्येनाच
म्य: पित्रादिमंडले पिंडानिर्वापणं कुर्यात् विकरदाने असंस्कृतप्रमीतानां त्यागी

ऽपसव्यं

प्रे॰नं॰ २२

नैमित्तिकरदानं विकोरेद्धिराचम्य सव्येन वैश्वदेविकब्राह्मणे चुलुकोदकस्यादा
नं सव्येन प्रेतपित्रादित्यनो ब्राह्मणेषु चुलुकोदानं भो ब्राह्मणाः तृप्तास्थ्याः इतिस्वस्थ्यः
ततोऽपसव्येन प्रेतमंडले गत्वा वेदीनिर्माय वेद्युपरि एकैकुशंकृत्वा अमुकगोत्र
ऽमुकप्रेत पिंडाशनं तवोपतिष्ठतां ततो वनेजनं तवोपतिष्ठतां ततो तिलमधुघृत
क्षीरमिश्रं पिंडं गृहीत्वा ऽमुकगोत्र ऽमुकप्रेत सपिंडीकरणश्राद्धे एषपिंडोपरि भवत्तवोप
तिष्ठतां तथा ऽमुकगोत्र ऽमुकप्रेत मज्जनं तवोपतिष्ठतां अयंतगंधमुपतिष्ठतां एतद्व
तां ऊर्णराजपत्राणि सूत्रं तवोपतिष्ठतां इति धूपदीपसंकल्पः अद्येह ऽमुकगोत्र ऽमुक
इमानि गंधाक्षतपत्रधूपदीपाणि सूत्राणि मधु अन्नवल्यादि तवोपतिष्ठतां तथा ऽमुकगो
त्रस्या मुकप्रेतस्या सपिंडीकरण श्राद्धे इदमन्नोदकादिकं यद्दत्तं तत्सर्वं तवोपतिष्ठतां
तथा ऽमुकगोत्रस्या ऽमुकप्रेतस्या सपिंडीकरणश्राद्धकर्मणः सांगतापल प्राप्तये इमां रजता
दिदक्षिणां ब्राह्मणाय दास्ये तांस्मै उपतिष्ठतां इति दक्षिणां दत्वा कर्मपात्रं विप्रपादा
विसृज्य सव्येन अनादिनिधनो देवेति पठित्वा आचम्य प्रेतपिंडं पंचगव्येन स्नाप्य च रामः॥

२२

न्यस्थले संस्थाप्य स्वयं सव्येनाचम्य: पंचगव्येन शिरो मार्जनं कृत्वा: पित्रादि स्थलेश-
त्वा: वेदिं कृत्वा: अपसव्येन गोमयेनोपलिप्य त्रिभिर्दर्भैर्वेदिमध्ये रेखाकरणं अपह-
ता असुरा रक्षांसि वेदिषदः उल्मुक धारणं ये रूपाणीति मंत्रेण अवनेजनं अद्ये-
हामुक गोत्र प्रेत पितः अमुक शर्मन् वसु स्वरूप पिंडासनं अवनेजनं निह्नुवः तथाऽमुक
गोत्र प्रेत पितामह अमुक शर्मन् वसु स्वरूप पिंडासने अवनेजनं निह्नुवः अद्येहामुक गोत्र प्रेत
पितामह अमुक शर्मान् आदित्य स्वरूप पिंडासनं अवनेजनं निह्नुवः उपमूल लूनकुशा
विस्तरणं सव्येन पाद स्मरणं ईशान विष्णु कमला मनेति ओं आसनाद्यनुज्ञयां पिंड
दानं करिष्ये ओं कुरुष्व ततोपसव्येन पिंडं गृहीत्वा: अद्येहामुक गोत्र प्रेत पितामुक शर्मन्
वसु स्वरूपस्य सपिंडीकरणश्राद्धे एष ते अन्नपिंडं अमृतमस्तु इदं मूर्ध्नी गयायां तुल्यं इदं मुख्यं
गंगायां अमुक गोत्राय प्रेत पित्रे अमुक शर्मणे वसुस्वरूपाय तथा प्रेत पितायप्रपितामह पिंडं द-
त्वा लेपभागी नामयं भागोस्त्विति लेपभागं दत्त्वा पिंडोत्तरकर्म आच्छादनं कृत्वा सव्येन पिं-
डानाचमनं उदङ्मुखेन श्वासं नियम्य अत्र पितर इति ततः प्रत्यवनं अद्येहामुक गो

त्प्रेतपिताः अमुकशर्मन् आदित्यस्वरूपपिंडप्रेतवनिक्ष्य रुद्रस्वरूपपिंडोभायव
नेनिक्ष्य तथाप्रेतपितामह अमुकशर्मन् आदित्यस्वरूपपिंडप्रेतवनिक्ष्य किंचिनि
विश्रसन नमोवः इतिषडंजलीकरणं एतद्वपितरवास इतिसूत्रदानं ऊर्ज
वहंतिनिजलेनोर्जकरणं देवताभ्योनित्यजयेत पिंडार्चपितृभ्यः स्वधायिभ्योति·धू
पदीपादिसंकल्प पिंडाग्रभूमौ सुप्रक्षत्तमस्तुः इत्यादिमूर्द्धाभिषेकादिकृत्वा अभि
षेकय आसवेन अक्षय्योदकदानं अद्येहःमुकगोत्रस्य प्रेतपितुअमुकशर्मणः
वसुस्वरूपस्य सपिंडीकरणश्राद्धे इदमन्नोदकादिकं यदत्तंतदक्षय्यमस्तु अस्तु अक्ष
यं अद्येहःमुकगोत्रस्यप्रेतपितामहःमुकशर्मन्रुद्रस्वरूपसपिंडीकरणश्राद्धे इ
दमन्नोदकादिकंयदत्तंतदक्षय्यमस्तु अस्तुक्षय्यं तथाप्रेताप्रपितामह ऽमुकशर्मन आ
दित्यस्वरूपस्य सपिंडीकरणश्राद्धे यदमन्नोदकादिकं यदत्तंतदक्षय्यःमस्तु मस्तु
अक्षय्यं ततः आशिग्रहणं ततःप्रेतपिंडपित्र्यादिपिंडयाजयेत प्रेतपिंडपिंडाग्रेनिधा रामः॥
यगांगागयाकुरुक्षेत्रादिन स्मृत्वा इशान्यदिपदान्स्मृत्वा ॐगणेशायनमः ॐ २३

स्कंदाय नमः ॐ शशिने नमः ॐ दिवाकराय नमः ॐ दक्षिणामूर्तये नमः ॐ गार्हपत्याय न
मः ॐ आह्वनीयाय नमः ॐ क्रोंचाय नमः ॐ महेशाय नमः ॐ यमसेन नमः ॐ काश्यपा सपा२
यनमः ॐ पद्मयोनये नमः ॐ नारायणाय नमः ॐ महादेवाय नमः ॐ गदाधराय नमः
इति देवानाममंत्रैः स्मृत्वा सुवर्णरजतसलाकया दर्भेण त्रिधा विभाज्य अपसव्येन वा
मपाणिना प्रथमशलाकं आदाय दधिसंयुक्तं कृत्वा अद्येह अमुकगोत्रः अमुकप्रेत अमुको
ते णप्रेत पित्राः अमुकशर्मणा सह प्रेतत्वविमुक्ते पितृत्वकारणाय पिंडान सपिंडयं योजया
मि योजयेति ब्राह्मणा प्रत्युक्तिः अनेन मंत्रेण संपूज्य तुत्वा पृथिवी वायु प्रजापति संस्र
जध्वं पूर्वभिः पितृभिः सहमानीव आकुति समानी हृदयाणि वः समानवस्तु वो मनो
यथा वस्तु सहासति ॐ गच्छध्वं संवध्वं संवो मनांसि जानतां देवाभाग यथा पूर्वे संजा
नानुमुपासते ॐ ये समाना समनस पितरो यमराजे तेषां लोकास्वधा यामनो यज्ञो
देवेषु कल्पतां ॐ ये समान समनस पितरो जीवा जीवेषु मामका तेषां ५ श्रीर्मयो क
ल्पतामस्मिं लोके सतं समाः इति पठित्वा कारस्य प्रेतपिंडस्य तृतीयभागाय

श्रा.मं.
२४ डमेजोऽन्यः मुहूर्तं विधाय पूर्वस्थाने संस्थापयेत् ततो द्वितीयपिंडशकलं गृहीत्वा अद्येहाऽमु
कगोत्र ऽमुकप्रेत ऽमुकगोत्रेण प्रेतपितामहेन अमुकशर्मणा रुद्रस्वरूपे मह्येतत्त्वे विमुक्ति
पितृत्वकारणाय पिंडेन सह पिंडयोजः सह पिंडं योजयामि योजयेति प्रत्युक्तौ संसृजत्वित्यादि
मंत्रान्पठित्वा पिंडमेलनं कुर्यात् तथैव पिंडस्य तृतीयशकलं गृहीत्वा अमुकगोत्रः
मुकप्रेत ऽमुकगोत्रेण प्रेतपितामहेन ऽमुकशर्मणा आदित्यस्वरूपेण महेप्रेतत्वविमुक्तये पितृ
त्वकारणाय पिंडे सह पिंडं योजयामि योजयेति प्रत्युक्ते संसृजंतु त्वेति मंत्रान्पठित्वा पूर्वपिं
डमेलनं कृत्वा तं पिंडं अश्मेन रभिमृशेत् ऽश्मयानुगतप्रेतः पितरस्तं दद्यामि वः शिवमस्तु व
शेयाणां जायतां चरजीवनं समानिव आकूतिः समानि हृदयानि व समानमस्तु वो मनो यथा
वःसुसहासती इति मंत्राभ्यां मभिमृश्य ॐ पितृभ्यः स्वधायिभ्य इति मंत्रेण गंधादिभिस्तं सं
पूज्यः ततः स्वधावाचनं कुर्यात् भो ब्राह्मणा युष्मद[illegible]नया स्वधावाचयिष्ये वाचितां
अद्येहा अमुकगोत्रेभ्यः अमुकपितृभ्यः ऽमुकशर्मभ्यो वसुस्वरूपेभ्यः ब्राह्मणाम
घ२ स्वधोवाच्यतां अस्तुस्वधा तथाऽमुकगोत्रेभ्यः अमुकपितामहेभ्यः अमुकशर्मभ्यः राम:

रुद्रस्वरूपेभ्यः ब्राह्मणाः मधुरस्वधोवाच्यतां : अस्तुस्वधा : तथाऽमुकगोत्रेभ्यः अमु
कप्रपितामहेभ्यः आदित्यस्वरूपेभ्यः ब्राह्मणामधुरस्वधोवाच्यतां अस्तुस्वधा ततो
उत्तानपात्रंकृत्वा पितरः स्वर्गलोकमास्थिताभवंतु ढुंढे गोर्जकरणं ऊर्जंवहंतिरमृतं
घृतंपयः कीलालंपरिश्रुतं स्वास्थतर्पयत मेपितॄन् ततोदक्षिणासंकल्पः अद्येहित्यादिअ
मुकगोत्राणां अमुकनाम्नपितृपितामहप्रपितामहानांऽमुकाऽमुकशर्मणां वसुरु
द्रादित्यस्वरूपाणां कालकामसंज्ञकाविश्वेदेवापूर्वकं सपिंडीकरणश्राद्धकर्मणः सद्गुणया
थइमांरजतसोमदैवत्यं इमांदक्षिणांचब्राह्मणेभ्योविभज्यदास्ये तथाऽमुकगोत्रस्यऽमुकपित्रा
दीन्प्रयश्राद्धकर्मणासद्गुणयाथं इमांसुवर्णनिष्क्रियभूतं द्रव्यंब्राह्मणादास्ये तत्सत विश्वदे
वाप्रियतां वैश्वदेविकविप्रकरेजलंदत्वा स्वतिलकं सत्यानुष्ठानुसंपन्नासर्वदायज्ञवृद्धयः
पितृमातृपराश्चैव सत्यस्माकुलजानरा विशेषपूजनं आयुपुत्राधनंविद्यामितिः ततःपिंड
उत्थायाघ्राय अन्यत्रधृत्वाः पिंडस्थापनेः शयंचकल्पितयन तत्रदीपस्थानं वहुक्षेत्रुपूजनं
वशंतेत्यादि पिंडस्थानेपिंडः दीपस्थानेदीपंनिधायः यांतुपितृगणासर्वेतिः इत्यादिपठित्वा

श्रा॰सं॰
२५

त्या १
एकाद्धित्यिनृरूपेणाभ्यादिपठित्वा देवताभ्योविजपित्वा: मन्त्रव्याधेत्वं पठित्वा: ततः
ऽमुकगोत्रस्य ऽमुकपितु सपिंडीकरणाः हीनं प्रमादे ल्लोभामयान्न्यूनातिरिक्तं य
त्कृतं तत्सुक्षतं मस्तु तत्सर्वं श्रीविष्णोः प्रसादाद्ब्राह्मणा नुथाय आमावाज्येस्याति
कं प्रदक्षिणीकृत्वाः वाजेवाज्येति मंत्रेण विसृज्य दीपं निर्वाप्य आचम्यः सुप्रश्चश्र
रयस्य स्मृत्वेति पठित्वा अच्युताय नमः ॥ इति सपींडीकरण श्राद्धविधिः अथ अश्व
त्थमवनस्पृजनविधिः द्वादशाहे वेपोडशाहे वा शनिभौमयुक्तणदिवसे अश्वत्थस्यसे
चनं कुर्यात् अश्वत्थसमीपंगत्वा पूर्वस्यां वोत्तरस्यां वा दिशिं वेदिं कृत्वा स्वशाखोक्तवि
धिनां पंचभूसंस्कार पूर्वकमग्निं संस्थाप्य संकल्प अद्येहेत्यादि अमुकगोत्रेऽमुक
सिरमुकोहं ऽमुकगोत्रस्या अस्मिन्पितु अमुकशर्मणोवसुरूपस्य अ[illegible]
णाः शुभफलप्राप्तये आत्मोद्धारार्थं अश्वत्थसेचनपूर्वकस्याधिकारसिद्ध्यर्थं अश्वत्थसमी सा३
पे नवग्रहमंत्रे होमं करिष्ये: इति संकल्प्य: ब्रह्मवरणं कृत्वा कलसे नवग्रहान्संपूज्य र
क्षाप्रतिष्ठां कुर्यात् ब्रह्मोपवेशनादि पर्युक्षणांतकर्म कृत्वा तन्त्रोद्र्व्यत्याग अने राम
२५

न ऽमुकार्थं होमकर्मणाहं यक्ष्ये तथाभूरादिनीव्याहृतिभिः स्विष्टकृतं चाद्येनाहं यक्ष्ये इत्या
ज्य ततः देवताभ्यो मयापरित्यक्तं यथादैवतमस्तु तत्सन्नमुः एतं तेनिप्रतिष्ठाप्य ओं भू
र्भुवः स्वः तारणानामाग्ने सुप्रतिष्ठितो भव इति प्रतिष्ठाप्य ओं अग्नये नमः इतिनाममंत्रे
ण पाद्यादिभिः संपूज्य आत्मणाचाघो मनसा प्रजापतिं ध्यात्वा जुहुयात् ओं प्रजापतये
स्वाहा इदंप्र० ओं इंद्राय स्वाहा इदमिंद्राय ओं अग्नये स्वाहा इदमग्नये ओं सोमाय स्वा०
इदं सोमाय ततः सूर्याय नमः इत्यादिनाममंत्रेण नवग्रहहोमं कुर्य्यात् संकल्पः अद्येह ऽमु
कोहं एतत्कालार्थं नवग्रहहोमकर्मणः सङ्गतार्थं अपूर्वेणां पूर्णं सद्रव्यं ब्राह्मणेन तुभ्यम
हं संप्रददे अनेन कर्मणा प्रीयतामिति मंत्रपाठं कृत्वा ततः अश्वत्थसेचनपूर्वजनं कुर्य्यात्
संकल्पः कुशतिलयवजलान्यादाय अद्येहेत्यादि ऽमुकराशि ऽमुकशर्माहं ऽमुकगोत्र
स्य अस्मत्पितु ऽमुकशर्मणो गोत्र ऽमुकस्वरूपस्य अद्यावधि वर्षपर्य्यन्तं आह्लादकत्रिंशिका
म षष्ठ्याधिक शतत्रय शटकं कुंभैः सदंत धावने अश्वत्थसेचनपूजनं करिष्ये इति संक
ल्पः मंत्रः मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपरो अग्रतः शिवरूपाय वृक्षराजनमो

अ॰मं॰
२८

स्तुते इति मंत्रेण पाद्यादिभिः मंत्रेण नीराजनं ततः संपूज्य पिष्टातकेन त्रिसूत्रेणावेष्ट्याःज
लेन सेचयेत् सेटकेन परिमाणं कृत्वा दुग्धमिश्रितं जलं कृत्वा सेचनमंत्रः अश्वत्थ विष्णु
रूपेण नमो धरणिसंभवः आङ्गिरायेष्वशाखिश विगताश्रयतस्ततः तत्रतत्र स्थितानि
त्वं तर्प्यपश्चापित्रीन्मम सेचयामि जलेन घनसो नारायणात्मने इति मंत्रेण जलेना सिं
च्य सप्तवारं प्रदक्षिणीकृत्वा होमदक्षिणासंकल्पः अद्येत्यादि अमुकोहं अश्वत्थ
सेचनांग भूतशांतिक होमकर्मणः सांगुण्यार्थं इमां दक्षिणां ब्राह्मणेभ्यो विभज्य दा
स्ये तत्सत् दक्षिणां दत्वा घृतछायाज्यावृपरद्वांवंधन अभिषेक तिलक मंत्रपाठ कारयि
त्वा परिधत्तशुक्लोकंचकोसीय वसुनो विप्रसुहृद्धधुजनो ब्राह्मण द्वार पुण्याहवाचयि
मार्ग त्वा मध्ये शांतिकाध्यायं पठित्वा कर धृतकरस्त्रां चोटयित्वा गृहमागच्छेत् गृहप्रवेशं कृत्वा
स्वेष्टदेवं नमस्कृत्य ब्राह्मणेभ्यो दक्षिणां भोजनं दत्वा नमः स्कृत्य पुनरागतपर्णावेष्टदेवा
दिकं कृत्वा स्वयं भुंजित इति अश्वत्थसेचनविधिः समाप्त स्मृत्यंतरे द्विप्रहर घटिका
न्यूना द्विप्रहर घटिकाधिका कुतपः स च विज्ञेया पितृणां दत्तमक्षयः १ भ्रातृद्वयेन
कर्त्तव्यं न कुर्याज्जन्मभूमि ८ नकर्त्तव्यं पिता मृते अपत्निके न कर्त्तव्यं न कुर्याज्जन्मभूमि रामः

पति २ भ्रातृश्वंपितोदेवपितामुत्तयथाक्रमः एकपाद्यंनकर्त्तव्यंकर्त्तव्यंचपृथक्पृथ
क् ३ उच्छिष्टशिवनिर्माल्यंवमनंशवकर्पटं श्राद्धंमस्यविनाशिदाहितकुनपस्तथाः
४ धंदंतधावसभ्यानयकेशनिःकृंतनः कर्त्ताचैनपूर्वेद्युभोक्तानेवपराहनिः ५
अथपंचकशांतिविधिः तस्यार्द्धः गतिप्रोक्ता संततंचाशुभंभवेत्त कुंभमीनगतेचंद्रेम
रणंयदिजायते १ नतस्यदाहकर्त्तव्यो विनासर्वजातिषु लोकयात्रानचस्नानंन्योद
कंनेवदर्शनं २ अथपंचकदिनेकार्य्योदाहस्तुविधिपूर्वकं तदासवसमीपेतुकर्त्तव्या
पंचपूतला ३ यवपिष्टानानुलिप्त्वा उर्णासूत्रेणवेष्टिता दर्भमयाः सवमुखाशाप्येना
मतंक्रमशत ४ प्रेतवाहप्रेतसवः प्रेतयःप्रेतभूम्पियः पंचमप्रेतहर्ताचः चितायांस्थापयेत
तः ५ शिरस्थानेदक्षिणेकुक्षौ वामकुक्षौतथैवच नाभौस्त्वपादयो मध्येतेभ्योदद्याचम
र्जनिः ६ उदकांचततोदद्या तन्नामभिस्तुपृथकपृथक् प्रेतावाहोधनिष्ठायां प्रेतसवःश
ततारिका ७ भूताधिपस्तुपूर्वांचप्रेतभूमिश्चउत्तरे रेवतिप्रेतहर्ताचक्रमाद्दद्यातिलोद
कः ८ सूतकांतेतथाविप्रा शान्तिकुर्य्यातथाश्रुणु मूर्तिस्वर्णमयिकृत्वा नायके

ये.मं.
२७

न पृथक् पृथक् ८ बालशान्त्यं चकुर्य्याचा वाराछिद्रविवर्जयेत् पंचरत्नसमोपेतान्
वस्त्रयुग्मेन वेष्टितान् १० तत्र शांतिप्रकर्त्तव्या नीशा व्याहृतपूर्विका स्थंडिलं हस्तमात्रं स्तो
वस्त्राक्षतं तथा: ११ पंचमूर्तिस्तथा स्नाप्य कलशोपरि पृथक् पृथक् प्रतिष्ठाप्य कुर्वित
स्वसारवोधितमंत्रत: १२ ब्राह्मणास्तेषु कुंभेषु वासालंकोशायवै न्याघकुंभे ततः सय्
हराध्यायजपस्तथा १३ याम्यकुंभे न्यसेतंव रक्षाचं चैव पश्चिमे उत्तरे प्रति सूत्तं चैव ऋ
चदा चतुपचुमे १४ नत्र थानगतिं याति प्रेत पुत्रस्य नो ध्रुवं ततः पटलमंगलाच स्वस्ति
वाच द्विजोत्तमे: १५ स्वगृह्योक्तविधानेन कृतां ग्रह स्वस्थापनं न्नविधानवपर्णाय देवता
नियथोक्तराह १६ चतुर्द्दशयमास्तत्र स्थापनेनामम न्नभि: नवग्रह: मुरवकार्य्यातथावि
त्वानुसारयो १७ यमायनम: धर्मराजायनम: २ मृत्यवेनम: ३ अंतकायेनम: ४ वैवस्व
तायेनम: ५ कालायेनम: ६ सर्वभूतक्षयायेनम: ७ उदुंबरायेनम: ८ दध्नायेनम: ९
नीलायनम: १० परमेष्ठियेनम: ११ वृकोदरायनम: १२ चित्रायनम १३ चित्रगुप्ता
यनम: १४ इतिचतुर्द्दशयमप्रत्येकपूजयेत् न्याघारावाज्यभागा चतुगयदनंतर न यमः॥

द्रदेवतां मंत्रेर्होमं कुर्य्यात्तथैव च:१८ तथाभाहुतिदद्यात् मंत्रेणानेन षोडश शन्नोदे

वीनि: ततः आपोहिष्ठामंत्रत्रयं कुर्य्या १९ धनिष्ठावसुदेवता मंत्र ऊं वसो पवित्रमसि

सतधारं वसो पवित्रमसि सहस्त्रधारं देवस्त्वा सविता पुनातु वसो पवित्रेण सतधारेण सुप्वा

कामधुक्ष्य १ शतभिषा वरुणदेवता मंत्र ऊं वरुणस्योत्तंभनमसि वरुणस्य

स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसद

नमासीद २ पूर्वाभाद्रपदा अजपादेवता मंत्र ऊं तन्नोऽग्नि वरुणा विद्वान्देवस्य हेडो अवया

सिसीष्ठा: यजिष्ठो वह्नितम: शोशुचानो विश्वाद्वेषांसि प्रमुमुग्ध्यस्मत्: ३ उत्तराभाद्रपदो नाम

सि: स्वस्ति धिपस्ते पितानूमस्ते स्तुमामाहिंसी सोनिवर्त यामि आयुषेन्नाद्याय प्रजननाय रायस्पोषा

य सुप्रजाय स्त्वाय सुवीर्य्याय ४ पूषा मंत्र अग्निस्द्रवरुणामित्रदेवाराद्विश पितानकदो त वि

सो विशानवियाभद्रो अदद्या पूषा भग स्वरस्वति: पूषसी ५ एभिर्मंत्रेर्जपं कार्य्या ब्राह्मणे

वेदपारगे पूजयेत्यावरालिंग: नैवाद्यकगवाहफल दस्थापित देवतानां हि पूजां कुर्य्याय यथाविधि:

ततः पूर्णाहुति दद्यान्पूजायित्वा यथा हुताशनं एवं समाप्य हवन धेनुदद्या पयस्विनि

ग्र.गं.
२८

तिलदानेवचसुंव सप्तधान्यसमन्वितं भोजनंच यथाशक्त्या ब्राह्मणान्भोयागान एवं
यंकुरुते पुत्रः स्वस्तुभेनोभवेरतिः वाल्लोवृद्धोयुवाचैव: पंचकेसु मृताश्चये: विधानंये
नकुर्वंतिविघ्नेतयानजायते तस्मात्सर्वप्रयत्नेन शांतिकुर्य्याद्यथाविधिः भूत्वातु शांति
सर्वः सुखनचसंजीवनः ततोभिषेचमंत्रः यथावाराणमहाराणाक वचंभवतिवारणा त
द्देवोपचात्मना शांतिभवतिवारीभिः यंतेकेवचाघोराः भि यंतेगिरिघ्वरा: भियंतेसर्व
शास्त्राणि-भ्रमेयेयाब्राह्मणाशिवा यथासमुत्थितंयत्रं मंत्रेणप्रतिहन्यते तथासमु
त्थितंघोरं सद्य शांत्याप्रशाम्यते गृहाणावोनरेंद्राश्च ब्राह्मणाश्चविशेषत पूजिताश्र
तिपूज्यंते देव्यंत्यच समान्विताः सुराचैनेनदानेन साधूनांसंगमेनच: स्वस्तुयाव: अविघ्ना
णां चाल्पमृत्युविनश्यति: द्यौशांतिरन्तरिक्षं शांतिः पृथिवीशांती: राप:सांति:रो
षधीयः शांति: वनस्पतिय: शांतिः विश्वेदेवा: शांति: ब्रह्माशांति: सर्वं शांति: रे
वाशांतिरेधिस्तुशांतिः भवंतु ॐ विश्वानदेवासवितु दुरितानि पराशुभाः ज्नाभद्रंय
सेकपर्दीनो दयद्विराप्रवरामहे मतियथा समसद्विपदे चतुष्पदे विश्वपुष्टंगामेय रामः॥

२८

स्मिन्ननुत्तरं यंयंकाम यत्तेकामं सोमो कामंसंपद्यते धनंधान्यंपशुपुत्रकुर्वीत सुदीर्घ
मायुशुभेन: मार्कंडेयपुराणोक्तपंचकशान्तिसमाप्तम् ॐ अद्येहित्यादि ऽमुकगोत्रस्यपि
तरं ऽमुकशर्मणाः धनिष्ठादिपंचकमरणाधिकारणापित्रगत्वर्थं सत्सहतकुट्वादिपूर्वक
मरणाधिजनकर्त्तृदाहजुग्यदोषनिवारणार्थं अन्यशुभफलप्राप्त्यर्थं कर्त्तव्यंपंचकगोत
मिति भारद्वाजो विश्वामित्रोर्थ कश्यपः वशिष्ठो जगुद मनोष्ठ सेष्ठेत ऋष्यय: सिभूता
मे तिथवारदोयुग्मत्तिनद्रोदे: भरतिन तिकोभागसोख्य अस्यकारेरणक वंधनवस्यनहो
दैपातालजाजामनकीन नवहायहिंता जाहि लोकविधानः इति अस्नकविचार अ
थत्रयोदशात्रिवादिनेअनक्ष्या सामग्री: पागलु १ कुश २ तिल ३ मधु [illegible] ५ पुष्प ६
धूप ७ दीप ८ नैवेद्य ९ मेवा १० तुलाई ११ वलीस्नानाभांडे १२ [illegible] १४ जोज [illegible] पावान: वाग २४ जो
अनंत तवर ऊपानह भूषणा यथाशक्ति गऊवछ्छा महिश दोहाकोधात्तिर हथयार डा १५
पंच ५ लष्ठिका १ पलंग १ लेफ २ तकिया १ वडेपदनो चाहिये फुलवहुत कोस्तलो
ग सूपारि १० नालियर १ सालगज ५ चंदन सेपद सुगंध पक्षा १३ वंगर २३ पवि

त्रि५० मोदक ५० मूंगाऊ १६ सोपारी २१ कपडे सपेद ११ बडे कलशे ४ छोटे कल
शे २१ दिवे १६ दिवे ३६० कपडे १२ आसन वडे १२ साहाली १२ सोपारि १२ गोदा
चंदा सूत्र गज ५ वस्त्रा १ वछि ४ गौन्या १२ घोडा १ आसन वडे १२ दास दासि २ रथ
१ पालगि १ रुईवस्त्र १ घुंघरू १२ घंटा १ कांसि २ मिसा १ मवलीसेर १। चाटासे
र ५ चावल सेर २१ चावल का आटासेर ५ छिंगरूपकी मासा छिगगुनके मासा १
कंचनपूरूष मासे १॥ रेसमवस्त्र गज १ महत्तसेर १ घृतसेर ५ गोधूदसेर २० कलश
छोटे ३६० एकघडा वटि ३६० रुईसेर २ तिलसेर २ तेल १ उर्नं॥। डिवि १६ आविया १६
तिलसेर १ गंगाजल आटायव सेर १० सप्तधान्य ७ सात अन हार त्रिशूल लोहके
१ चक्र लोहका १ कंचनमिर्का १६ पावली चंदीकी ६० धोति २१ कवि १२ गुडसेर ५
प्रतिमा मासा सुवर्णकि खड १ मिश्रि सेर १ तस्मै घृत पकावान कर्पास लुण १ तराप
देर १२ एकपदवडा करो। चुला लोहका १ चंदसुगरीका १ सिर्थसपेद १ तामकल
शः १॥ गंगाजल तुलसीपत्र भृंगराज लूण १ उकंच तिल लोह हरिद्रायव कपास
लवण तथा सप्तधान्य गुडगावा माहादानानि चा धा १ आधा भागद्वयया वस्त्र रामः

अथप्रेतश्राद्धवर्ज्यमाह:॥ नस्वधाविकिरंचैव नमंत्राशिषस्तथा तृप्तिप्रश्नोनचाधीनंनदेवश्रोद्धरणादिकं ॥ प्रेत श्राद्धेविवर्ज्याणि कर्म्माण्यष्टौविजानता नवमंवन्हि होमंच दशमंस्वस्तिवाचनम्॥ १॥ तथा कार्य्या णि सर्वाणि षोडशश्राद्धकर्म्मणि• पृच्छामनार्घ्यपूजान्नसंकल्पाश्चावनेजनं॥ २॥ पूजाविप्रस्यपिंडस्या स्तरणस्यान्नस्यकल्पना• संकल्पोदक्षिणायाश्च तथाविप्रविसर्जनं॥४॥ प्रेतश्राद्धेदेभिरंगैर्द्वादशभि:सदा ५ दुर्गाहोमेपितृश्राद्धे विवाहेयज्ञमेदनौ दिव्याकालेनृपोल्लंसर्गवन्हिचक्रंनचिंतयेत्॥६॥ इतिग्रंथान्तरम्॥

अथामासिक १ प्रथममासिक २ त्रिपक्ष ३। द्वितीय• ४ तृतीय• ५ चतुर्थ६ पंचम• ७ ऊनषण्मा ८ षण्मासिक• ९ सप्तमा• १० अष्टम• ११ नवम• १२ दशम• १३ एकादश १४ ऊनाब्धिक १५ आब्दिक • १६ उमालं• दर्भ महावारी तामातामे लये धृवा १ पितरप्रेतउप सव्य• विश्वेदेवा मनुष्यदेवता आचमनविसु सव्य १ हव्यदेवा कव्यपितर २ विसुसप्या मृतसया २ यथावत् आषाढ़अवदि४ मे हरीरामवघासका स्वर्गवास:• तिथी चतुर्दशी छन्नम की• संवत १९४७ वीश्वदेवा उत्तरे चतुरस्त्रमडलं

दक्षिणे प्रेत मडलं त्रिकोणं तत्पूर्वपितामहादि मंडलं वर्तुलं गोलं सर्वसामग्री स्थापयेत् विश्व• पव• पितर• तिल• प्रे• धूरा•

ग्रंथ प्रेतमंजरी लिख्यते संवत १९४२ मीनार्कगतांशा २४ भौमवासरे

प्रथमं दंपतिं पूज्या शय्यादेया ततः परः पश्चात्कपिलादेया उदकुंभास्तथैव च वृषोत्सर्गं ततः
कार्य्यं पश्चादेकादशाह्निको षोडशश्राद्धं ततकार्य्यं सपिंडीकरणं तथैव च २ इति विधिः ॥१